# गद्यभागः

SCERT TELANGANA

## चतुर्दशविद्याः

**अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।**
**धर्मशास्त्रं पुराणञ्च विद्याह्येताश्चतुर्दश ॥**

**चत्वारो वेदाः - ऋक् - यजु - साम - अथर्वणाः ।**
**षट् वेदाङ्गानि - शिक्षा - व्याकरणम् - छन्दः - निरुक्तम् - ज्योतिषम् - कल्पश्चेति ।**
**मीमांसाशास्त्रम् , न्यायशास्त्रम्, धर्मशास्त्रम् पुराणञ्च आहत्य चतुर्दशविद्याः इति प्रकीर्त्यन्ते ।**
**चतुर्दशविद्यापारङ्गतः यः सुकृती भवति सः साक्षात् महर्षिरेव ।**

## उपनिषदः

वेदाः संहिता - ब्राह्मण - आरण्यक - उपनिषद्भागैः चतुर्धा विभक्ताः। तेषु भागेषु उपनिषदः शाश्वतस्य परब्रह्मणः तत्त्वं प्रतिपादयन्ति । 'उपनिषद एव वेदान्ताः' इत्युच्यन्ते । सृष्टिस्थितिलयविषयकतत्त्वचिन्तनं कुर्वन्ति कारयन्ति च । प्रामुख्येन अष्टोत्तरशतम् (१०८) उपनिषदः वर्तन्ते । तासु दश उपनिषदः एव प्रमुखत्वेन स्वीकृताः । ताश्च अनेन श्लोकेन ज्ञायन्ते ।

**"ईश - केन - कठ - प्रश्न - मुण्ड - माण्डूक्य - तित्तिरिः ।**
**ऐतरेयं च छान्दोग्यं - बृहदारण्यकं तथा ॥ इति ॥**

# १.शब्दमात्रान्न भेतव्यम्

प्रथमः भागः

## पठन्तु, विचिन्त्य वदन्तु

| | | |
|---|---|---|
| आचार्य : | - | छात्राः ! अस्मासु हासः, भयम्, शोकः इत्यादयः कथं सम्भवन्ति ? |
| रुक्मिणी | - | आचार्य ! आनन्ददायकविषयस्य श्रवणेन दर्शनेन च मनसि हासः जायते । |
| चन्दना | - | मनसि यदा उद्वेगः भवति, तदा भयम् उद्भवति । |
| आचार्यः | - | तादृशः उद्वेगः कथं सम्भवति ? |
| श्रीरामः | - | हठात्, शब्दश्रवणेन, दुर्घटनादेः श्रवणेन दर्शनेन च । |
| आचार्यः | - | तर्हि शब्दश्रवणात् भयं भवति खलु ! तादृशीं कथामेकां पठामः । |
| छात्राः | - | अवश्यं महोदय ! |

**प्रश्नाः ?**

1. देहबलबुद्धिबलयोः मध्ये किं महत् ?
2. अनालोच्य न कर्तव्यम् इति किमर्थं वदन्ति ?
3. सर्वदा का युक्ता भवति ?

## उद्देश्यम्

★ सम्यगालोच्य स्वीक्रियमाणः निर्णयः एव सत्फलं ददाति । अतः निर्णयस्वीकरणे विमर्शनम् आवश्यकम् इति अभिबोधनम् ।

★ छात्रेषु व्यक्तित्वविकासवर्धनम् ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।



2018-19

SCERT TELANGANA



अस्ति श्रीपर्वते 'ब्रह्मपुरं' नाम किञ्चन नगरम् । तस्य श्रीपर्वतस्य शिखरप्रदेशे घण्टाकर्णः नाम कश्चन राक्षसः निवसतीति किंवदन्ती आसीत् ।

कदाचित् केचन नगरजनाः तेन मार्गेण गच्छन्तः मानवस्य खण्डिताङ्गं मृतकलेबरमपश्यन् । ते विस्मिताः भीताः दुःखिताश्च सन्तः एवमचिन्तयन् "किमेतत् ? भयङ्करं दृश्यते ! प्रतिक्षणं घण्टारवश्च श्रूयते । स राक्षसः घण्टाकर्णः कुपितस्सन् मनुष्यान् खादति घण्टाञ्च वादयति । अतः इतः वयं शीघ्रं पलायनं कुर्मः इति । ततः ते पलायनं कृत्वा नगरजनान् सर्वानपि एतां घटनामवदन् । नगरजनाः भीताः सन्तः सर्वे नगरं त्यक्तुं इच्छन्ति स्म । अत एवोक्तम् ।

**"गतानुगतिको लोकः न लोकः पारमार्थिकः"** इति ।

तदा नगरस्य राजा चिन्ताकुलः सन् एवम् उदघोषयत् "यः घण्टाकर्णं मारयिष्यति, तस्मै विपुलं सुवर्णं दास्यामि" इति ।

तस्मिन्नेव नगरे कराला नाम साहसिका, चतुरा स्त्री एवमचिन्तयत् -

**शब्दमात्रान्न भेतव्यं विज्ञेयं शब्दकारणम् ।**
**वैशद्येन सुविज्ञाय प्रतीकारो विचिन्त्यताम् ॥**

एकस्मिन् दिने सा वनं गतवती । वने कञ्चित् कालम् उषित्वा प्रत्यागमनसमये सा एकां घण्टाम् अनीतवती ।

नगरजनाः तस्याः समीपे विद्यमानां घण्टां दृष्ट्वा "कराला घण्टाकर्णं मारितवतीति" अचिन्तयन् । तदा सा राज्ञः सभायाम् एवमवोचत् "राजन् श्रीपर्वते घण्टाकर्णः नाम राक्षसः नास्ति । तत्र कस्यचन मानवस्य कलेबरं विद्यते । स नरः चोरः । सः कदाचित् घण्टां चोरयित्वा गच्छन् व्याघ्रेण भक्षितः स्यात् । तस्य हस्तगलितां घण्टां केचन वानराः लीलया वृक्षशाखायाम् अबध्नन् । वृक्षेषु वानराणां क्रीडनसमये घण्टारवः भवति । स एव रवः जनैः शृतः।

अहं तु वनं गत्वा वानरेभ्यः फलानि विकीर्णवती । यदा वानराः फलखादने निमग्नाः, तदाहं घण्टां स्वीकृत्य प्रत्यागतवती । अतः घण्टाकर्णः नाम राक्षसः अस्तीति प्रवादमात्रम्'' इति । तदा स राजा तां सम्मानितवान् ।

**''उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः''**

### कविपरिचयः

अतिप्राचीनस्य पञ्चतन्त्रस्य आधारेण अनेके नीतिबोधकाः ग्रन्थाः रचिताः सन्ति । तेषु अन्यतमः हितोपदेशः । अस्य कर्ता नारायणपण्डितः वङ्गदेशीयः । अस्य कालः क्री.श. 1000 - 1300 मध्ये इति विमर्शकाः अभिप्रयन्ति । अस्मिन् हितोपदेशे मित्रलाभः, मित्रभेदः, सन्धिः, विग्रहः च इति चत्वारः विभागाः विद्यन्ते ।

गद्यपद्यात्मकरूपेण हितोपदेशरचना अस्ति । प्रस्तुतकथायाः आधारः स एव हितोपदेशः।

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

#### अ. अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।

१. देहबलं महत् वा ? बुद्धिबलं महत् वा ? इति अंशमुद्दिश्य समूहद्वये छात्राः उपविश्य चर्चां कुर्वन्तु ।

२. 'साहसं धीरगुणः' इत्यंशं निरूपयन्तः वदन्तु ।

३. आलोच्य करणेन कार्याणि कथं भवन्ति, अनालोच्य करणेन कथं भवन्ति इति विषयं मनसि निधाय द्वयोः छात्रयोः प्रथमः एकमंशं समर्थयन्, द्वितीयः अन्यमंशं समर्थयन् वदताम् ।

#### आ. पाठेऽस्मिन् क्त्वाप्रत्ययान्तानि पदानि चित्वा लिखन्तु ।

#### इ. अधः दत्तानां वाक्यानां समानार्थकवाक्यानि पाठे अन्विष्य लिखन्तु ।

१. केवलशब्दश्रवणमात्रेण न <u>भेतव्यम्</u> ।

२. सम्यक् <u>परीक्ष्य किं</u> कर्तव्यमिति आलोचनीयम् ।

३. यः जनः घण्टाकर्णं मारयिष्यति तस्मै <u>कनकं</u> दास्यामि ।

४. राक्षसेन भीताः जनाः नगरं <u>विहाय अगच्छन्</u> ।



SCERT TELANGANA

## ई. अधः दत्तानि वाक्यानि सन्दर्भानुसारं क्रमेण पुनः लिखन्तु ।

१. प्रतिक्षणं घण्टारावः श्रूयते ।

२. कराला नाम साहसिका चतुरा स्त्री अचिन्तयत् ।

३. श्रीपर्वते घण्टाकर्णः नाम राक्षसः नास्ति ।

४. श्रीपर्वते ब्रह्मपुरं नाम नगरमस्ति ।

५. कराला एकां घण्टाम् आनीतवती ।

६. यः घण्टाकर्णं वधिष्यति तस्मै सुवर्णं यच्छामि इति राजा अवदत् ।

७. एकस्मिन् दिने सा वनं गतवती ।

## उ. अधः दत्तं गद्यांशं पठित्वा प्रश्नानामुत्तराणि लिखन्तु ।

ग्रीष्मकालः सुखदस्य वसन्तकालस्य पश्चात् आगच्छति । ग्रीष्मकाले सूर्यस्य आतपः प्रखरः भवति । मानवाः पशुपक्षिणः, वृक्षाः चापि प्रखरतापेन व्याकुलाः भवन्ति । केचित् जनाः विहाराय पर्वतस्थलं गच्छन्ति । केचित् गृहे वातानुकूलितेषु तिष्ठन्ति । नद्यः सरोवराः तडागाः च शुष्यन्ति । सर्वत्र जलस्य अभावः दृश्यते । परं यदि ग्रीष्मकालस्य प्रचण्डः तापः न स्यात् तर्हि मेघाः कथं भविष्यन्ति ? मेघान् विना कुतः वृष्टिः ? ग्रीष्मकालस्य प्रभावात् एव वर्षर्तुः आगच्छति । ग्रीष्मकाले गुल्मोहरवृक्षेषु रक्तानि पुष्पाणि अतीव शोभन्ते । मल्लिकामालतीत्यादिषु लतापादपेषु सुगन्धमयानि श्वेतानि पुष्पाणि विकसन्ति ।

१. ग्रीष्मकालः कस्य कालस्य पश्चात् आगच्छति ?

२. जनाः किमर्थं पर्वतस्थलेषु गच्छन्ति ?

३. ग्रीष्मकाले कस्य अभावः दृश्यते ?

४. केषु वृक्षेषु रक्तानि पुष्पाणि ग्रीष्मकाले आगच्छन्ति ?

५. श्वेतानि पुष्पाणि कुत्र विकसन्ति ?

## ऊ. अधः दत्तानां प्रश्नानां समाधानानि पाठमाधारीकृत्य लिखन्तु ।

१. श्रीपर्वते श्रूयमाणा किंवदन्ती का ?

२. नगरजनाः किमर्थं भीताः ?

३. राजा किमुक्तवान् ?

४. कराला किं चिन्तितवती ?

५. कराला राजानं प्रति किमुक्तवती ?



SCERT TELANGANA

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ. अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. ''शब्दमात्रान्न भेतव्यम्'' इति किमर्थं वदन्ति ?

२. क्रियाशीलाः कथं स्वकार्यं निर्वहन्ति ?

३. बुद्धिबलदेहबलयोः भेदः कः ?

४. ''मनो बलीयः खलु देहशक्तेः'' इति अंशं भवान् कथं समर्थयति ?

५. करालावत् बुद्धिबलेन भवद्भिः कृतं कार्यमेकं स्वीयवाक्यैः लिखन्तु ।

### आ. अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. पाठस्य सारांशं स्वीयवाक्यैः लिखन्तु ।

२. ''बुद्धिरेव गरीयसी'' इति अंशमुद्दिश्य निबन्धं लिखन्तु ।

### इ. सर्जनात्मकतया समाधानानि लिखन्तु ।

१.. पराक्रमेण अशक्यमपि कार्यम् उपायेन शक्यं भवति इति उदाहरणपूर्वकं निरूपयन् मित्रं प्रति पत्रं लिखन्तु ।

२. अधः दत्तं परिच्छेदं संस्कृतभाषया अनुवदन्तु ।

ఒక వృద్ధుడు ఉండేవాడు. అతనికి ఆకలి వేసింది. దగ్గరలోనే ఒక మామిడి చెట్టు ఉన్నది. ముసలివాడు ఆ చెట్టు దగ్గరకు వెళ్ళాడు. చెట్టుపైన చాల పండ్లను చూచాడు. అతడు ఆలోచించాడు. నేను ముసలివాడను నా శరీరంలో శక్తి లేదు. చెట్టు ఎత్తుగా ఉన్నది ఎలా పైకి వెళ్ళగలను? ఎలా పండ్లను కోయగలను? అని అనుకున్నాడు. చెట్టుపైన కోతులు ఉన్నాయి. ముసలివాడు ఒక ఉపాయం ఆలోచించాడు. అతడు రాళ్ళను తీసుకొని కోతులపై విసిరాడు కోతులు కోపించాయి. అవి పండ్లను విసిరాయి. ముసలివాడు ఆ పండ్లను తీసుకొని సంతోషంగా తిన్నాడు.

### ई. प्रशंसात्मकतया प्रतिस्पन्दनं कुर्वन्तु ।

भवतः कक्ष्यायां करालासदृशाः बुद्धिमन्तः / धैर्यवन्तः भवन्ति चेत् तान् अधिकृत्य वदन्तु ।

## III. भाषांशाः

### १. पदजालाभिवृद्धिः

### अ. भिन्नप्रकृतिकं पदं रेखाङ्कितं कुर्वन्तु ।

१. अद्य, एकम्, तदा, नूनम्

२. तस्य, तम्, तया, तस्मिन्


SCERT TELANGANA

३. बुद्धिमान्, उक्तवान्, पठितवान्, अपसारितवान्

४. उत्थाय, विहस्य, आगमनाय, निवार्य

५. पिता, पुत्रः, पुत्री, सखा

### आ. उदाहरणमनुसृत्य रिक्तस्थानानि पूरयन्तु ।

**उदा -** सः पुरस्कारम् आप्नोति । (आप्)

त्वं पुरस्कारम् आप्नोषि । (आप्)

अहं पुरस्कारम् आप्नोमि । (आप्)

१. सः कथां ................. (श्रु)

त्वं कथां ................. (श्रु)

अहं कथां ................. (श्रु)

२. सः वक्तुं ................. (शक्)

त्वं वक्तुं .................. (शक्)

अहं वक्तुं .................. (शक्)

३. सः पुष्पाणि ................ (चित्र्)

त्वं पुष्पाणि ................ (चित्र्)

अहं पुष्पाणि ................. (चित्र्)

### इ. मञ्जूषायां दत्तानां पदानां साहाय्येन अधः दत्तम् अनुच्छेदं पूरयन्तु ।

| | | | |
|---|---|---|---|
| तापः | सुखकरः | हरति | भ्रमणाय |
| उद्यानेषु | आम्रवृक्षे | वसन्तकालः | शीतकालस्य |

.............. शीतकालस्य पश्चात् आगच्छति । अधुना .............. तीव्रं शैत्यं नास्ति । ग्रीष्मकालस्य तीव्रः ................. अपि नास्ति । ...................... पुष्पाणां शोभा चित्तं ............... । जनाः .................. गच्छन्ति । .................. कोकिलः मधुरं कूजति । एषः कालः अति ............. भवति ।

## 2. व्याकरणांशाः

### अ. अधः दत्तानि वाक्यानि पठन्तु । सन्धिपदानि परिशीलयन्तु ।

१. डोलायां **शिशुश्शेते** ।

२. सीता, रामः **लक्ष्मणश्च** वनं गतवन्तः ।



SCERT TELANGANA

३. भीमः शक्तियुक्तः **अन्यच्च** युक्तियुक्तः ।

४. **भगवज्ज्योतिः** सर्वदा सर्वत्र प्रकाशते ।

## आ. उपरि दत्तेषु वाक्येषु रेखाङ्कितानां सन्धिपदानां विवरणम् अवगच्छन्तु ।

| | | | | | | |
|---|---|---|---|---|---|---|
| १. शिशुश्शेते | = | शिशुस् | + | शेते | | (स् + श् = श्श्) |
| २. लक्ष्मणश्च | = | लक्ष्मणस् | + | च | | (स् + च् = श्च्) |
| ३. अन्यच्च | = | अन्यत् | + | च | | (त् + च् = च्च्) |
| ४. भगवज्जोतिः | = | भगवद् | + | ज्योतिः | | (द्+ ज् = ज्ज्) |

उपरितनेषु उदाहरणेषु

१. सकारस्य शकारयोगे सकारस्य स्थाने ''श'' वर्णः आगतः ।

२. सकारस्य चकारयोगे सकारस्य स्थाने ''श'' वर्णः आगतः ।

३. तकारस्य चकारयोगे तकारस्य स्थाने ''च'' वर्णः आगतः ।

४. दकारस्य जकारयोगे दकारस्य स्थाने ''ज'' वर्णः आगतः ।

**सकारस्य शकार-चवर्गाभ्यां योगे सकारस्य शकारः तवर्गस्य शकारचवर्गाभ्यां योगे तवर्गस्य क्रमात् चवर्गः आदेशो भवति ।**

अयं **श्चुत्वसन्धिः** इत्युच्यते ।

**सूत्रम् - स्तोः श्चुना श्चुः ।**

## इ. अधः दत्तेषु उदाहरणेषु सूत्रार्थस्य समन्वयम् अवगच्छन्तु ।

**(१) स + (श् /चवर्गः) = श्**

मनस् + चञ्चलम् = मन + श् + चञ्चलम् = मनश्चञ्चलम् । (स् = श्)

रामस् + छात्रः = राम + श् + छात्रः = रामश्छात्रः । (स् = श्)

**(२) तवर्गः + (श / चवर्गः) = चवर्गः**

भगवत् + शक्तिः = भगव + च् + शक्तिः = भगवच्छक्तिः (त् = च्)

सत् + चित् = स + च् + चित् = सच्चित् (त् = च्)

सुहृद् + जगाम = सुहृ + ज् + जगाम = सुहृज्जगाम (द् = ज्)



SCERT TELANGANA

## (३) चवर्गः + तवर्गः = चवर्गः

यज् + नः = यज् + ञ् + अः = यज्ञः (न् = ञ्)

याच् + ना = याच् + ञ् + आ = याच्ञा (न् = ञ्)

## इ. अधः दत्तानि सन्धिकार्याणि कुर्वन्तु ।

### क. सन्धिं कुर्वन्तु ।

१. हरिस् + शेते =

२. सत् + चिद्रूपम् =

३. बृहत् + छत्रम् =

४. तपस् + चर्या =

५. दुःखिताः + च =

६. घण्टारवः + च =

### ख. विसन्धिं कुर्वन्तु ।

१. रामश्च =

२. तज्ज्वलति =

३. रामश्चिनोति =

४. बृहच्छिद्रम् =

५. उज्ज्वलनम् =

६. कश्चन =

SCERT TELANGANA

### परियोजनाकार्यम्

"बुद्धिरेव गरीयसी" - एतादृशानि वाक्यानि लिखित्वा पाठशालायां तत्र तत्र स्थापयित्वा दर्शयन्तु ।

**अलिरनुसरति परिमलं लक्ष्मीरनुसरति नयगुणसमृद्धिम् ।**

# २. क्रीडायाम् आनन्दः

प्रथमः भागः

**चित्रं पश्यन्तु, विचिन्त्य वदन्तु**



**प्रश्नाः ?**

1. चित्रे का अस्ति ? सा कथं वर्तते ?
2. क्रीडासु पराजये प्राप्ते सति का अनुभूतिः जायते ?
3. क्रीडासु जये प्राप्ते सति का अनुभूतिः जायते ?

**नेपथ्यम्**

★ क्रीडाः अस्मान् बहूपकुर्वन्ति । क्रीडया शारीरिकविकासेन सह मनः प्रमोदः अपि जायते । क्रीडासु विजये प्राप्ते सति अत्युत्साहः, पराजये प्राप्ते च सति निरुत्साहः न जायेत । तदैव वास्तविकः आनन्दः सम्पद्यते । यथाकथञ्चित् जयः प्राप्तव्यः इति धिया ये क्रीडन्ति ते वास्तविकमानन्दं नाप्नुवन्ति । ईदृशाः भावाः क्रीडाभावनायाः विघातकाः एव । अतः क्रीडासु केन यत्नेन आनन्दलाभः स्यात् इति ज्ञापयितुम् एव एष पाठः । एषा कथा ''आनन्दम्'' इति पुस्तकात् सङ्गृहीता । अस्याः कथाकारः ''दासरि वेङ्कटरमणमहोदयः''।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।





SCERT TELANGANA

सुवर्णगिरेः पालकः रत्नपालः । तस्य चतुरङ्गक्रीडायां महती प्रीतिरासीत् । सः प्रायशः सभाप्रमुखैः सह एनां क्रीडां खेलति स्म । सर्वदा क्रीडायां रत्नपालस्यैव विजयः सुनिश्चितः आसीत् । सः विजयः तं बहु रञ्जयति स्म ।

एकदा सचिवः सुदामा राजानं पराजितवान् । तदा सर्वदा जयं प्राप्तवतः रत्नपालस्य मुखं क्रोधेन विवर्णमभूत् । सः महता क्रोधेन चतुरङ्गफलकं विक्षिप्य अन्तःपुरम् प्रविवेश ।

राज्ञः ईदृशं व्यवहारं दृष्ट्वा सुदामा चकितः आसीत् ।

परस्मिन् दिने रत्नपालः सुदामानम् आहूय स्वदुर्व्यवहारविषये क्षमां याचितवान् । ततः पुनः क्रीडाम् आरब्धवान् । इदानीन्तनक्रीडायां रत्नपालः एव विजेता अभवत् । तेन तस्य मुखं विकसितम् । परम् अनन्तरक्रीडा सुदाम्ना जिता । तदा राजा वेगवन्तं क्रोधं मनसि रुन्धन् झटिति उत्थाय अन्तःपुरं प्रविष्टवान् ।

तस्मात् दिवसात् प्रत्यहं सुदामा एव विजेता भवति स्म । तेन पराजयेन राजा शोकसमुद्रे निमग्नः अभवत् । राजकार्येषु अपि तस्य मनो न रमते स्म । राज्ञः पराजयशोकविषयं सुदामा ज्ञातवान् ।

अतः परस्मिन् दिवसे सुदामा पराजितः । तेन राज्ञः मुखमण्डलं कान्तियुक्तमभूत् । तत् दृष्ट्वा सुदामा आनन्दितः । ततः स्वजयापेक्षयाऽपि राज्ञः सन्तोषाय सः प्रतिदिनं पराजयं प्राप्तुम् आरब्धवान् ।

अधुना प्रत्येकस्यां क्रीडायां रत्नपालः जयं प्राप्नोति स्म । परं सः पूर्ववत् क्रीडायाम् आनन्दं न लभते स्म । गच्छता कालेन चतुरङ्गक्रीडायां तस्य अरुचिः जाता । अहं पूर्वमिव क्रीडायाम् आनन्दं न अनुभवामि इति उक्तवान् । एतं विषयं ज्ञात्वा सुदामा एकं युवकं राजसभाम् आनीतवान् ।



हे राजन् ! एषः विश्वनाथः । अयं चतुरङ्गक्रीडायां विख्यातः क्रीडालुः । अयं क्रीडायां निपुणः । अतः भवतां जिज्ञासाः शमयितुं समर्थः ।

विश्वनाथः राजानं प्रणम्य उक्तवान् ''महाराज ! एकवारं भवान् मया सह चतुरङ्गं क्रीडतु । ततः परं भवतां शङ्काः निवारयिष्यामि''।

तस्य निवेदनेन तयोः क्रीडा आरब्धा । प्रथमायां क्रीडायां रत्नपालः एव विजयं प्राप्तवान् । तेन राज्ञः मुखं सन्तोषेण दीप्तम् । यतः सः विख्यातं क्रीडाकारं पराजयं प्रापितवान् । परं ततः परं सर्वासु क्रीडासु विश्वनाथः एव विजयं प्राप्तवान् । रत्नपालः व्यूहप्रतिव्यूहकरणेनाऽपि पराजितः । तेन सः क्रोधेन रक्तनेत्रः सन् महता कष्टेन क्रोधं निवारयति स्म ।

अवसरं दृष्ट्वा राजाज्ञया सुदामा विश्वनाथेन सह क्रीडाम् आरब्धवान् । सः प्रथमक्रीडायामेव विश्वनाथम् सलीलं पराजयं प्रापितवान् । सुदाम्नः जयेन रत्नपालः बहु आनन्दितवान् ।

विश्वनाथः रत्नपालं दृष्ट्वा उक्तवान् महाराज ! अधुना अहं भवतां सन्देहान् निवारयितुं सिद्धः अस्मि। क्रीडालूनां क्रीडाविषयकः आनन्दः द्विप्रकारेण लभ्यते । तत्र प्रथमः विजयप्राप्तये सः यथाकथञ्चित् तीव्रेच्छावान् भवति । तेन तस्य विवेकः लुप्यते । द्वितीयः जयापजयैः अविचलितः सन् क्रीडायाम् आनन्दम् अनुभवति । परं भवान् प्रथमप्रकारकः अस्ति । अतः सचिवेन पराजितः सन् भवान् तं पराजयं जीर्णीकर्तुं न शक्तवान् । पराजितानां खेदमुखानि दृष्ट्वा आनन्दावाप्तिः भवतः स्वभावः अभवत् । परं मन्त्रिणः पराजयेऽपि भवताम् आनन्दः नास्ति यतः मन्त्रिमुखे खेदभावापेक्षया शान्तभावाः सन्ति । तत्र कारणं तु भवन्तं विजयं प्रापयितुं सः पराजयं प्राप्नोति स्म । तस्य विवरणं श्रुत्वा रत्नपालः घटनानां सत्यतां मनसि चिन्तितवान् । तस्य मनसि सन्देहः समुत्पन्नः । सः विश्वनाथम् अपृच्छत् - ''प्रथमक्रीडायाम् अहं भवन्तं कथं पराजयं प्रापितवान् इति'' ।

तदा स्मेरमुखः सन् विश्वनाथः अकथयत् - तदानीम् अहं भवतां क्रीडां व्यूहप्रतिव्यूहान् च श्रद्धया परिशीलयामि स्म । भवान् क्रीडायां सहजनिपुणः एव, अतः भवान् मां पराजितवान् । परं भवतः क्रीडनपद्धतिं ज्ञात्वा व्यूहात्मकतया अहं भवन्तं पराजितवान् । तान् व्यूहान् भवान् ज्ञातुम् असमर्थः अभवत् । अतः क्रमशः पराजितः । ''परम् अस्माकं सचिवः भवन्तं कथं पराजितवान्'' इति अपृच्छत् राजा रत्नपालः । तदा विश्वनाथः उक्तवान् - सः मम चतुरङ्गक्रीडायाः शिक्षकः । न केवलं तदेव अपि तु सः प्रत्यहं मित्रमिव क्रीडायां मां दक्षतां प्रापयति । सः नेतरः अपि तु मम जनकः एव । सः एव मां बोधितवान् यत् पराजयः एव जयस्य सोपानम् इति कथयन् विश्वनाथः स्वच्छद्मवेषम् अपाकरोत् । सः सचिवस्य सुदाम्नः पुत्रः आनन्दः एव आसीत् ।

राजा रत्नपालः आनन्दम् अभिनन्दितवान् । ततः आरभ्य पितापुत्राभ्यां सह यथासमयं राजा चतुरङ्गं क्रीडति स्म । स्वल्पकालेनैव रत्नपालः चतुरङ्गक्रीडायां नैपुण्यं प्राप्तवान् । इदानीं राजा जयापजयाभ्याम् असम्पृक्तः सन् क्रीडायां वास्तविकानन्दम् अनुभवति ।

यतः विश्वनाथः उक्तवान् आसीत् - जयापजययोः निर्लिप्ततया क्रीडायां यः आनन्दं प्राप्नोति सः वास्तविकः क्रीडकः ।


SCERT TELANGANA

# एतानि कुर्वन्तु

## I. भावावगमनम् - प्रतिस्पन्दनम्

### अ. अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।

१. अस्यां कथायाम् आश्चर्यकारिणी घटना का ? तस्याः विषये वदन्तु ।

२. अस्यां कथायां भवताम् आकर्षकं पात्रं किं ? किमर्थम् ?

३. राज्ञः स्थाने भवान् अस्ति चेत् किं करोति ?

४. एनां कथां स्वीयवाक्यैः वदन्तु ।

### आ. अधः दत्तान् सन्दर्भान् पठन्तु । पाठ्यांशानुसारं पट्टिकायां राज्ञः प्रतिक्रियाः लिखन्तु ।

| सन्दर्भः | राज्ञः प्रतिक्रियाः |
|---|---|
| १. क्रोधसमये | |
| २. सचिवस्य पराजये | |
| ३. विश्वनाथस्य पराजये सचिवेन | |
| ४. राज्ञा विश्वनाथस्य पराजये | |

### इ. अधः दत्तानि वाक्यानि कः, कस्मिन् च सन्दर्भे कं प्रति उक्तवान् इति लिखन्तु ।

१. अहं पूर्वमिव क्रीडायाम् आनन्दं न अनुभवामि ।

२. अपजयः एव जयस्य सोपानम् ।

३. जयापजययोः निर्लिप्ततया क्रीडायां यः आनन्दः जायते सः वास्तविकः ।

### ई. अधः दत्तं गद्यांशं पठित्वा प्रश्नानामुत्तराणि लिखन्तु ।

आरोग्यमेव महाभाग्यम् । आरोग्यं नाम शरीरमनसोः प्रसन्नता एव एतदर्थम् अवश्यम् अस्माभिः क्रीडाः क्रीडनीयाः । क्रीडाभ्यः पूर्वदृष्टिः, समस्यापरिष्करणम्, व्यूहात्मकव्यवहारः, यथानुकूलं निर्णयानां स्वीकारः इत्यादिलक्षणानि अपि अभिवर्धन्ते। क्रीडाः मनुष्ये समतौल्यव्यवहारम् उत्पादयन्ति । कबड्डी, खो-खो, क्रिकेट् वालीबाल्, फुटबाल्, इत्यादिक्रीडाः मानसिकशक्त्या सह शारीरिकस्वास्थ्यसंवर्धनाय सहाय्यिकाः भवन्ति । क्रीडाः अस्माकं जीवने एकः भागः ।



SCERT TELANGANA

१. उपरितन्नानुच्छेदं किं कथयति ? तस्य शीर्षिकां लिखन्तु ।

२. क्रीडाभ्यः कीदृशानि लक्षणानि अभिवर्ध्यन्ते ?

३. क्रीडाः किमर्थं क्रीडनीयाः ?

४. मानवः मानसिकतया - शारीरिकतया स्वस्थो भवितुं कासाञ्चन क्रीडानां नामानि लिखन्तु ।

**ऊ. अधः दत्तानां प्रश्नानां समाधानानि पाठमाधारीकृत्य लिखन्तु ।**

१. रत्नपालस्य मुखे आनन्दः किमर्थं लुप्तः ?

२. सुदामा क्रमेण किमर्थं पराजितः ?

३. विश्वनाथः कः ? सः कस्य समीपे क्रीडासु नैपुण्यानि शिक्षितवान् ?

४. क्रीडनसमये कीदृशी जागरूकता आवश्यकी ?

## II भावव्यक्तीकरणम् - सर्जनात्मकता

**अ. अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।**

१. क्रीडासु भवतः काः क्रीडाः इष्टतमाः ? किमर्थम् ?

२. क्रीडाभ्यः अस्माभिः शिक्ष्यमाणविषयाः के ?

३. क्रीडासु जयापजयौ सहजौ । भवता क्रीडितक्रीडायां भवत्समूहः पराजितो भवति चेत् भवान् विजितसमूहेन कथं सम्भाषते ?

४. किमपि वा भवतु जयः प्राप्तव्यः इत्यंशं प्रति भवदभिप्रायः कः ?

**आ. अधः दत्तानां प्रश्नानां समाधानानि निबन्धरूपेण लिखन्तु ।**

१. क्रीडाभ्यः जायमानानि प्रयोजनानि विवृण्वन्तु ।

२. क्रीडासु भवतः इष्टतमा क्रीडा का? सा क्रीडा कथं क्रीडनीया इति स्वीयवाक्यैः लिखन्तु ।

३. भवन्तः उत्तमक्रीडाकाररूपेण अभिवर्धितुं किं कुर्वन्तीति दशवाक्यानि लिखन्तु ।

**इ. सर्जनात्मकतया समाधानानि लिखन्तु ।**

१. राजसचिवयोः घटनां सम्भाषणरूपेण लिखन्तु ।

२. भवतां विद्यालये क्रीडाप्रतिस्पर्धाः भवन्ति । तदर्थं सन्दर्शकानाम् आह्वानाय करपत्रमेकं निर्मीयताम् ।

**ई. प्रशंसात्मकतया प्रतिस्पन्दनं कुर्वन्तु ।**

१. भवतां विद्यालये स्थितानां क्रीडालूनां क्रीडानैपुण्यविषयिणीं चर्चां कुर्वन्तु ।

२. उत्तमक्रीडकाणां प्रशंसनं कुर्वन् एकं पत्रं लिखन्तु ।


SCERT TELANGANA

## III. भाषांशाः

### 1. पदजालाभिवृद्धिः

**अ. अधः दत्तानि पदानि उपयुज्य स्वीयवाक्यानि लिखन्तु ।**

१. अभिनन्दनम्   २. व्यूहः   ३. छद्मवेषः
४. नैपुण्यम्   ५. विख्यातः   ६. विवर्णः

**आ. अधः दत्तानां पदानां समानार्थकपदानि लिखन्तु ।**

१. पुत्रः   २. पिता   ३. गुरुः   ४. आनन्दः

**इ. भवन्तः बहुविधाः क्रीडाः जानन्ति । तत्र पाठशालायां गृहे च क्रीड्यमानाः क्रीडाः पट्टिकायां लिखन्तु ।**

| गृहक्रीडाः | पाठशालाक्रीडाः |
|---|---|
| | |

### 2. व्याकरणांशाः

**अ. इमं परिच्छेदं पठन्तु ।**

एकः काकः बहुदूरात् आगतः । सः पिपासया पीडितः। तदर्थं नदीसमीपम् गतः । तेन किञ्चित् जलम् पीतम् । तेन सः तृप्तः । हंसेन तु नद्यां जलक्रीडा कृता ।

**उपरितनरेखाङ्कितपदानि क्तप्रत्ययान्तपदानि । क्तप्रत्ययः त्रिषु लिङ्गेषु उपयोक्तुं शक्यते ।**

**आ. उपरि दत्ते अनुच्छेदे स्थितानि कानिचन क्तप्रत्ययान्तपदानि त्रिषु लिङ्गेषु अवगच्छन्तु ।**

| पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः | |
|---|---|---|---|
| आगतः | आगता | आगतम् | (आ+गम् + क्त) |
| पीडितः | पीडिता | पीडितम् | (पीड् + क्त) |
| गतः | गता | गतम् | (गम् + क्त) |
| पीतः | पीता | पीतम् | (पा + क्त) |
| तृप्तः | तृप्ता | तृप्तम् | (तृप् + क्त) |
| कृतः | कृता | कृतम् | (कृञ् + क्त) |



SCERT TELANGANA

इ. अधः दत्तेभ्यः मूलधातुभ्यः क्तप्रत्ययं योजयित्वा त्रिषु लिङ्गेषु पदानि लिखन्तु । तानि पदानि उपयुज्य एकैकं वाक्यं लिखन्तु ।

| | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|
| १. भू + क्तः | भूतः | भूता | भूतम् |
| २. भाष् + क्तः | _______ | भाषिता | _______ |
| ३. लिख् + क्तः | _______ | _______ | _______ |
| ४. स्था + क्तः | स्थितः | _______ | _______ |
| ५. आ + नी + क्तः | _______ | _______ | अनीतम् |
| ६. पठ् + क्तः | _______ | _______ | _______ |
| ७. क्रीड् + क्तः | _______ | _______ | _______ |
| ८. ताड् + क्तः | _______ | _______ | _______ |

ई. अधः दत्तेषु वाक्येषु क्तप्रत्ययपदानि अङ्कयन्तु ।

१. आलयात् प्रसादः आनीतः ।

२. गुरुणा पाठः पाठितः ।

३. मात्रा शिशुः लालितः ।

४. त्वया सत्यम् उक्तम् ।

५. गीतया क्रीडा क्रीडिता ।

## परियोजनाकार्यम्

1. चतुरङ्गक्रीडाफलकं निर्माय प्रदर्शयन्तु ।

2. प्रमुखचतुरङ्गक्रीडालूनां चित्राणि सङ्गृह्य भित्तिपत्रे योजयन्तु ।

अकीर्तिं विनयो हन्ति हन्त्यनर्थं पराक्रमः ।



2018-19

SCERT TELANGANA

# ३. नाटकचक्रवर्ती भासः

प्रथमः भागः

## चित्रं पश्यन्तु, विचिन्त्य वदन्तु




**भासनाटकचक्रेऽग्नौ क्षिप्ते च्छेकैः परीक्षितुम् ।**
**स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः ॥**

भासनाटकानां परीक्षणाय यदा तद्रचितानि सर्वाणि नाटकानि अग्नौ प्रक्षिप्तानि तदा स्वप्नवासवदत्तेतराणि नाटकानि अग्निना दग्धानि । परं सर्वदाहकः अग्निरपि 'स्वप्नवासवदत्तनाटकं' न दग्धवान् ।

**प्रश्नाः ?**

1.चित्रे किं दृश्यते ?

2. कं ग्रन्थं पावकः न दग्धवान् ?

3. तस्य रचयिता कः ? तस्य विशिष्टता का ?

**उद्देश्यम्**

★ नाटकचक्रवर्तिनः भासकवेः परिचयः ।

★ संस्कृतनाटकानां स्वरूपस्य परिचयः ।

### छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।



SCERT TELANGANA

**भासो हासः सरस्वत्या नाटकैरमृतोपमैः ।**
**नाट्यवाङ्मयव्योमेन्दुः शास्त्रज्योतिर्विभास्वरः ।।**

संस्कृतनाटककर्तृषु आदिमः भासः। प्रसिद्धकालिदासादपि प्राचीनः। भासेन विरचितानि नाटकान्येव प्राचीनभारतीयरूपकसाहित्यस्य उदाहरणरूपेण तिष्ठन्ति । प्राचीनकाले एव एतावन्ति नाटकानि विरचितानीति असाधारणोऽयं विषयः । अस्य नाटकानि अधिकानि सन्तीति कारणेन प्राचीनकालतः अपि एतेषां 'भासनाटकचक्रम्' इति प्रसिद्धिरागता । भासस्य जन्मप्रदेशः कालः च निश्चितरूपेण वक्तुं न शक्यते ।

**सूत्रधारकृतारम्भैः नाटकैर्बहुभूमिकैः ।**
**सपताकैर्यशो लेभे भासो देवकुलैरिव ।।**

इत्थं महाकवेः बाणभट्टस्य प्रशंसानुगुणं भासः संस्कृतजगति नाटककर्तृषु प्रथितयशः । रूपकभेदेषु भासस्य सर्जनात्मकशक्तिः प्रतिभा च दृश्यते । एतादृशरूपकभेदनिर्माणसामर्थ्यम् अन्येषु कविषु न दृश्यते इति वक्तुं शक्यते । नाटकपथप्रवर्तकेषु भासः सर्वाग्रणीरिति सुकरं वक्तुम् शक्यते ।

भासनाटकेषु प्रमुखाः विशेषताः सन्ति । भाषायां सरलता, सहजशैली, वर्णनेषु यथार्थता, चरित्रचित्रणे वैयक्तिकत्वम्, घटनासंयोजने सौष्ठवम् कथाप्रसङ्गस्याविच्छिन्नश्च प्रवाहः । भासः मानवीयमनोवृत्तीनां वर्णने आदर्शः । भासः भारतीयभावानां कविः । अस्य नाटकेषु भारतीयभावानां समीचीनः समन्वयः प्राप्यते । यथा - पितृभक्तिः, पातिव्रत्यम्, भ्रातृप्रेम, क्षमाशीलता त्यागादिकं च । अस्य नाटकेषु संवादाः संक्षिप्ताः प्रभावोत्पादकाश्च । उपमा - रूपक - उत्प्रेक्षा - अर्थान्तरन्यासालङ्काराणां प्रयोगः अस्य नाटकेषु विशेषतः अवाप्यते । अस्य नाटकेषु मौलिकता कल्पनावैचित्र्यं च विशेषेण उपलभ्येते । भासस्य भाषा सरला, सुबोधा, सरसा, नैसर्गिकी, रम्या सुप्रवाहा च । भासनाटकानि न केवलं पठनयोग्यानि अपि तु प्रदर्शनयोग्यानि ।

आश्चर्योऽयं विषयः यद्यपि भासः प्राचीनः तेन विरचितानि नाटकानि अपि प्राचीनानि, तथापि यावत्पर्यन्तं केरलप्रान्तीयः महापण्डितः श्री.टी. गणपतिशास्त्रिमहोदयः भासस्य त्रयोदशरूपकाणां तालपत्रप्रतीः तथैव हस्तलिखितप्रतीः प्राप्य 1912 तमे वर्षे मुद्राप्य पाठकलोकाय समर्पितवान्, तावत्पर्यन्तं भासः नाममात्रपरिचितः एव ।

सामान्यतया विश्वे सर्वे रूपककर्तारः प्रसिद्धकथाः आधारीकृत्यैव स्वरूपकनिर्माणं कुर्वन्ति । एवं रूपकरचनासम्प्रदायमनुसृत्य भासः इतिहासेभ्यः, तथा अन्यकथाभ्यः कथावस्तु स्वीकृतवान् ।
तेषां भासविरचितानि नाटकानि त्रयोदश । परिचयं प्राप्नुमः । कथावस्तु मूलाधारेण भासनाटकानि एवं विभक्तुं शक्नुमः ।

**श्रीमद्रामायणस्याधारेण -**

1. अभिषेकनाटकम्- किष्किन्धकाण्डात् आरभ्य युद्धकाण्डान्ता रामकथा अत्र वर्णिता ।
2. प्रतिमानाटकम् - रामवनवासात् आरभ्य रावणवधान्ता कथा वर्णिता ।



SCERT TELANGANA

## महाभारताधारेण



3. कर्णभारम् - ब्राह्मणवेषधारिणे शक्राय कर्णस्य कवचकुण्डलार्पणम् ।

4. ऊरुभङ्गम् - पाञ्चालीपरिभवप्रतिक्रियार्थं भीमेन गदायुद्धे दुर्योधनस्य ऊरुभञ्जनम् अत्र वर्णितमस्ति।

5. दूतवाक्यम् - महाभारतयुद्धात् पूर्वं पाण्डवार्थं दुर्योधनसंसदि श्रीकृष्णस्य दूतत्वेन गमनं प्रयत्नवैफल्यं च अत्र वर्णितमस्ति ।



6. पाञ्चरात्रम् - यज्ञान्ते द्रोणः दक्षिणारूपेण पाण्डवेभ्यः राज्यार्धं दुर्योधनं ययाचे । पञ्चरात्राभ्यन्तरे पाण्डवानाम् उदन्तः उपलभ्यते चेत् राज्यार्धं मया दास्यते इति दुर्योधनोक्तिः पञ्चरात्राभ्यन्तरे पाण्डवानां प्राप्तिः । दुर्योधनकृतराज्यार्धप्रदानं च।

7. दूतघटोत्कचम् - अभिमन्युनिधनानन्तरं श्रीकृष्णप्रेरणया दौत्यमाश्रित्य घटोत्कचस्य धृतराष्ट्रान्तिकागमनम् ।

8. मध्यमव्यायोगः - भीमः मध्यमनामानं ब्राह्मणकुमारम् एकं घटोत्कचात् अत्रायत ।

9. बालचरितम् - बालस्य श्रीकृष्णस्य जन्मन आरभ्य कंसवधान्तं विद्यमानश्रीकृष्णचरितम् अत्र वर्णितमस्ति । (कृष्णकथारूपकात् चरितमिह वर्ण्यते भागवतात्)



10.प्रतिज्ञायौगन्धरायणम् - उदयनस्य वासवदत्तया सह प्रणयः (चरित्ररूपकात्) परिणयश्च अत्र वर्णितः।



11.स्वप्नवासवदत्तम् - वासवदत्ताग्निदाहेन दग्धेति प्रवादस्य प्रचारः यौगन्धरायणप्रयत्नात् पद्मावत्या सह उदयनस्य उपयमः अपहृतराज्यावाप्तिश्च अत्र वर्णिता ।

12. अविमारकम् (कल्पितकथा) - राजकुमारस्य अविमारकस्य राज्ञः कुन्तिभोजस्य दुहित्रा कुरङ्ग्या सह प्रणयपरिणयः अत्र वर्णितः ।

13. चारुदत्तम् (कल्पितकथा) - उदारचित्तेन चारुदत्तेन सह वसन्तसेनायाः प्रणयः अत्र वर्णितः ।

"प्रथितयशसां भाससौमिल्लकविमित्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य क्रियायां कथं बहुमानः" इति मालविकाग्निमित्रे कालिदासः भासं प्रशंसितवान् । कविकुलगुरोः कालिदासस्य अनेन प्रशंसनेन ज्ञायते भासस्य वैशिष्ट्यम् ।

SCERT TELANGANA

# एतानि कुर्वन्तु

## I. भावावगमनम् - प्रतिस्पन्दनम्

### अ. अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।

१. भारतीयभाषाः कति ?

२. भासस्य भाषा कीदृशी ?

३. बाणभट्टः भासं प्रशंसितवान् । भवान् कथं प्रशंसति ?

### आ. अधः दत्तं विषयमाधारीकृत्य तत्सम्बद्धस्य नाटकस्य नाम लिखन्तु ।

१. पद्मावत्या सह उदयनस्य विवाहः .................... ।

२. कर्णेन कवचकुण्डलदानम् .................... ।

३. दुर्योधनसभायां श्रीकृष्णस्य गमनम् ................ ।

४. वासवदत्तोदयनयोः परिणयः ...................... ।

५. रामवनवासात् आरभ्य रावणवधपर्यन्तं .................... ।

### इ. यथोचितं योजयन्तु ।

| | | | | |
|---|---|---|---|---|
| **उदा** - बालचरितम् | - | | श्रीकृष्णजननम् | |
| १. ऊरुभङ्गः | - | अ. | उदयनः | |
| २. दूतवाक्यम् | - | आ. | भीमः | |
| ३. पाञ्चरात्रम् | - | इ. | कुरङ्गी | |
| ४. मध्यमव्यायोगः | - | ई. | द्रोणः | |
| ५. प्रतिज्ञायौगन्धरायणम् | - | उ. | दुर्योधनः | |
| ६. अविमारकम् | - | ऊ. | श्रीकृष्णः | |

### ई. अधः दत्तं परिच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

पूर्वकाले यथा श्रीहर्षचक्रवर्ती भारतदेशं पालयति स्म तथा ह्युयान्त्साङ्गः नामकः चीनादेशीयः यात्री भारतदेशं समागत्य भारतीयसंस्कृतिवैशिष्ट्यम् अवगतवान् । अनेकान् धर्मग्रन्थान् विविधानि ऐतिहासिकवस्तूनि च सङ्गृहीतवान् । श्रीहर्षः तं सम्मान्य तस्य प्रतिप्रयाणाय नौकां व्यवस्थाप्य, रक्षणार्थं विंशतिः ''योधांश्च प्रेषितवान् । समुद्रमध्ये नौका चण्डमारुतप्रभावात् अधिकभारतया च डोलायमाना अभवत् । नौकायां भाररहितार्थं संस्कृतसाहित्यस्य रक्षणार्थं च ते योधाः ग्रन्थानां जले क्षेपणापेक्षया स्वयं समुद्रे कूर्दनमेव वरमिति मत्वा समुद्रे अकूर्दन् ।



SCERT TELANGANA

१. ह्युयान्त्साङ्गः कानि सङ्गृहीतवान् ?

२. श्रीहर्षः यात्रिणः कृते किं कृतवान् ?

३. योधाः किमर्थं जले अकूर्दन् ?

### उ. अधः दत्तनां प्रश्नानां समाधानानि पाठमाधारीकृत्य लिखन्तु ।

१. भारतीयरूपकसाहित्ये कस्य नाटकानि प्रसिद्धानि ?

२. केन कारणेन भासस्य नाटकानां प्रसिद्धिः अभवत् ?

३. भासः संस्कृतजगति प्रशस्तिं कथं प्राप्नोत् ?

४. भासनाटकेषु प्रमुखान् विशेषान् लिखन्तु ।

५. भासानाटकेषु भारतीयभावाः के ?

६. भासनाटकानि केन कथं च प्राचुर्यं आनीतानि ?

७. भासः कथावस्तु कुतः स्वीकृतवान् ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ. अधः दत्तनां प्रश्नानां लघुसमाधानानि लिखन्तु ।

१. ''भासनाटकचक्रम्'' इति प्रसिद्धिः कथम् अभवत् ?

२. संस्कृतसाहित्ये इतरनाटककाराणां नामानि लिखन्तु ।

३. अधुना नाटकानां स्थितिः कीदृशी वर्तते ?

### आ. अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. भासनाटकानां प्रामुख्यं विशदयन्तु ।

२. भवता ज्ञातं नाटकमेकं स्वीयावाक्यैः लिखन्तु ।

### इ. सर्जनात्मकतया समाधानानि लिखन्तु ।

१. एकं भासनाटकं प्रदर्शयन्तु ।

२. अधः दत्तं परिच्छेदं संस्कृतभाषया अनुवदन्तु ।

నాపేరు గులాబి పువ్వు. చెట్టుపై నివసిస్తాను. గాలి నన్ను మెల్లమెల్లగా సుతారంగా తాకుతుంది. పగలు సూర్యునికిరణాలు నన్ను వికసింపజేస్తాయి. రాత్రి వెన్నెల నన్ను లాలిస్తుంది. నాకు అనేక రంగులు ఉన్నాయి. అవి తెలుపు, పసుపుపచ్చ, నారింజరంగు. ఎరుపు, తెలుపు కలిసిన 'గులాబి' నా సహజమైనరంగు. మిక్కిలి ఎరుపుతో కూడిన నా పూలంటే జనులకెంతో ఇష్టం. నా సౌందర్యాన్ని గురించి కవులు బాగా వర్ణించారు. వివాహకార్యక్రమాలయందు నేను మండపాలను శోభింపజేస్తాను. పూర్తిగా వికసించిన నా రూపాన్ని చూసి జనులు నన్ను అభినందిస్తారు. అంతటా సువాసనను వెదజల్లి చివరికి ప్రకృతిమాత ఒడిలో నిద్రపోతాను.

### ई. प्रशंसात्मकतया प्रतिस्पन्दनं कुर्वन्तु ।

भासनाटकचक्रे किं नाटकं भवद्भ्यः रोचते ? तत् उद्दिश्य पञ्चवाक्यानि वदन्तु ।

## III. भाषांशाः

### 1. पदजालाभिवृद्धिः

#### अ. अधः दत्तेषु वाक्येषु रेखाङ्कितपदानां विरुद्धार्थकपदानि ज्ञात्वा तान्युपयुज्य स्वीयवाक्यानि लिखन्तु ।

**उदा -** भासो हासः सरस्वत्याः नाटकैरमृतोपमैः ।

हासः × दुःखम्

सर्वदा सर्वकार्येषु दुःखं मा प्राप्नुयात् ।

१. नाटकपथप्रवर्तकेषु भासः सर्वाग्रणीरिति सुकरं वक्तुं शक्यते ।

२. भासनाटकेषु अनेकाः विशेषताः सन्ति ।

३. भासेन विरचितानि नाटकानि एव संस्कृतसाहित्ये प्राचीनानि ।

४. गणपतिशास्त्रिमहोदयैः एव जनेभ्यः भासः परिचितः जातः ।

#### आ. अधः दत्तेषु वाक्येषु रेखाङ्कितपदानां समानार्थकपदानि ज्ञात्वा तानि उपयुज्य नूतनवाक्यानि लिखन्तु ।

१. भगवान् नारायणः देवेभ्यः सुधां वितीर्णवान् ।

२. सुविशालस्य गगनस्य आदिः अन्तः च ज्ञातुं नैव शक्यते ।

३. श्रीकालहस्तीश्वरस्वामिदेवालयः अतीव पुरातनः अस्ति ।

४. श्रीरामचन्द्रस्य कीर्तिः जगति सर्वत्र व्याप्नोत् ।

५. द्रौपदी द्रुपदमहराजस्य पुत्री आसीत् ।

६. गृहस्थाश्रमप्रवेशार्थं विवाहो नाम संस्कारः आवश्यकः ।

### 2. व्याकरणांशाः

#### अ. अधः दत्तानि सन्धिकार्याणि कुर्वन्तु ।

| १. सन्धिं कुर्वन्तु, सन्धिनाम निर्दिशन्तु । | | | २. विसन्धिं कुर्वन्तु, सन्धिनाम निर्दिशन्तु । |
|---|---|---|---|
| अमृत | + | उपमैः | नाटकान्येव |
| असाधारणः | + | अयम् | सन्तीति |
| तथा | + | अपि | कृतारम्भैः |
| यज्ञ | + | अन्ते | प्रशंसानुगुणम् |
| दुर्योधन | + | उक्तिः | आश्चर्योऽयं |
| दग्धा | + | इति | प्रभावोत्पादकः |

## आ. अधः दत्तानि वाक्यानि पठन्तु । रेखाङ्कितपदानि परिशीलयन्तु ।

१. **कृष्णं वन्दे** जगद्गुरुम् ।

२. **पुस्तकं पश्य** ।

३. भक्तः **हरिं श्रयते** ।

४. विजयलक्ष्मीः **वीणां वादयति** ।

उपरि दत्तेषु वाक्येषु रेखाङ्कितानां सन्धिपदानां विवरणम् अवगच्छन्तु ।

| | | | | |
|---|---|---|---|---|
| कृष्णं वन्दे | = कृष्णम् | + | वन्दे | (म् = ०) |
| पुस्तकं पश्य | = पुस्तकम् | + | पश्य | (म् = ०) |
| हरिं श्रयते | = हरिम् | + | श्रयते | (म् = ०) |
| वीणां वादयति | = वीणाम् | + | वादयति | (म् = ०) |

उपरितनेषु उदाहरणेषु मकारस्य व्यञ्जने परे मकारस्य स्थाने अनुस्वारः आगतः ।

**अयं अनुस्वारसन्धिः इत्युच्यते ।**

सूत्रम् - **"मोऽनुस्वारः"**

मान्तस्य पदस्य अनुस्वारः स्याद्धलि । अर्थात् व्यञ्जने परे पदान्ते स्थितस्य मकारस्य अनुस्वारः भवति ।

म् + व्यञ्जनानि = ०

| | | | | |
|---|---|---|---|---|
| रामम् | + | वन्दे | = | रामं वन्दे । (म् = ०) |
| गुहायाम् | + | तपति | = | गुहायां तपति । (म् = ०) |

## ई) अधः दत्तानि सन्धिकार्याणि कुर्वन्तु ।

**क. सन्धिं कुर्वन्तु ।**

१. हरिम् + श्रयते
२. मालायाम् + सूत्रम्
३. धर्मम् + चर
४. सज्जनम् + मानय
५. फलम् + खादतु
६. रामम् + वन्दे

**ख. विसन्धिं कुर्वन्तु ।**

१. वाक्यं शृणोतु
२. आपणं गत्वा
३. सत्यं वद
४. पापं शान्तम्
५. एवं कृत्वा
६. वाणीं वन्दे

### परियोजनाकार्यम्

विविधकवीनां तेषां ग्रन्थानां नामानि च सङ्गृह्य भित्तिपत्रिकायां लेपयन्तु, प्रदर्शयन्तु ।



SCERT TELANGANA

# ४. एम्. एस्. सुब्बुलक्ष्मीः

द्वितीयः भागः

## पठन्तु, विचिन्त्य वदन्तु

( गृहस्य समीपस्थात् देवालयात् 'भजगोविन्दम्' इति स्तोत्रं श्रूयते तत् श्रुत्वा.........)

पुत्री - अम्ब ! तत् गीतं किमस्ति ? अतीव श्राव्यं मधुरञ्च वर्तते ।

अम्बा - तत्सङ्गीतमिति, सङ्गीतम् इत्येकं विशिष्टं शास्त्रं कला च ।

पुत्री - सा गायिका का अस्ति ? तस्याः स्वरः कोकिलस्वर इव अस्ति ।

अम्बा - तां भवती न जानाति किम् ? अस्तु सा का इति, तस्याः वैशिष्ट्यमपि वदामि शृणोतु ।

**प्रश्नाः ?**

1. देवालये किं श्रूयते ।
2. किं शास्त्रं विशिष्टमिति वदन्ति ?
3. कस्याः स्वरः कोकिलस्वर इव वर्तते ?

## उद्देश्यम्

★ छात्रेषु सङ्गीताभिरुचेः विकासः ।

★ ललितकलासु, अभिरुचेः संवर्धनम् ।

★ उत्तमव्यक्तित्वनिर्माणम् ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA



(प्रातः षड्वादनमभवत् । श्रीलता निद्रातः न उत्थितवती ।)

अम्बा - श्रीलते ! उत्तिष्ठतु ! षड्वादनमभवत् ।

श्रीलता - अम्ब! इतोऽपि किञ्चित्कालं निद्रामि ।

(आकाशवाणीतः सुप्रभातं श्रूयते)

श्रीलता - अम्ब ! आकाशवाणीतः किं श्रूयते ?

अम्बा - वेङ्कटेश्वरसुप्रभातम् । प्रतिशनिवासरं षड्वादने प्रसारितं भवति खलु !

श्रीलता - स्तोत्रस्य गानं बहुमधुरम् । अस्य गायिका का ?

अम्बा - भवती शीघ्रं दन्तधावनं कृत्वा आगच्छतु । तां गायिकामुद्दिश्य कथयिष्यामि ।

(श्रीलता दन्तधावनं कृत्वा आगच्छति)

श्रीलता - अम्ब ! इदानीं वदतु । वेङ्कटेश्वरसुप्रभातम् आकाशवाण्या का गायन्ती अस्ति ?

अम्बा - सा गायिका प्रमुखकर्णाटकसङ्गीतविदुषी एम्. एस्. सुब्बुलक्ष्मीमहोदया । तस्याः सम्पूर्णं नाम मधुरै षण्मुखवदियर् सुब्बुलक्ष्मीः । सा 16/9/1916 दिनाङ्के मधुरैपत्तने जन्म अलभत । माता षण्मुखवदियर् अम्माल् । पिता तु सुब्रह्मण्यअय्यर् । अस्याः माता निरन्तररङ्गस्थलसङ्गीतकलाकोविदा । अतः आबाल्यादेषा सङ्गीतपरिवेशे अवर्धत । पितुः प्रोत्साहेन बाल्ये एव अस्यां भक्तिभावाः प्रवर्धिताः ।

श्रीलता - अम्ब ! एम्.एस्. सुब्बुलक्ष्मीः कस्मिन् वयसि सङ्गीतकार्यक्रमान् आरभत ?

अम्बा - अद्य शनिवासरः खलु ! भवती शीघ्रं शिरःस्नानं कृत्वा आगच्छतु । इतोऽपि विशेषान् श्रावयिष्यामि ।

(श्रीलता शिरःस्नानं कृत्वा, देवं नमस्कृत्य श्लोकं गायति)

**कौसल्यासुप्रजा राम ! पूर्वा सन्ध्या प्रवर्तते ।**

**उत्तिष्ठ ! नरशार्दूल ! कर्तव्यं दैवमाह्निकम् ।। इति ।।**



SCERT TELANGANA

अम्बा - इदानीं सम्यक् गीतवती । शृणु एम्.एस्. सुब्बुलक्ष्मीः त्रयोदशे वयसि एव मद्रास्सङ्गीतसंस्थायां, प्रथमसङ्गीतकार्यक्रमं कृत्वा सङ्गीतपण्डितैः प्रशंसापात्रतां प्राप । तदारभ्यैव एषा प्रमुखकर्णाटकगात्रसङ्गीतविदुषीरूपेण विश्रुता । इयं विदुषी न केवलं संस्कृते, अपि तु कन्नड-आन्ध्र-तमिल-मलयाल-बेंगाली-गुजराती-मराठी-पञ्जाबी-हिन्दीभाषासु च भक्तिसङ्गीतमालाप्य न्यूयार्क् , लण्डन्, मास्को इत्यादिप्रान्तेषु सङ्गीतकार्यक्रमान् कृत्वा भारतदेशसांस्कृतिकदूतिकारूपेण अस्माकं भारतीयसंस्कृतेः सौरभं पश्चिमदेशेष्वपि प्रासारयत् ।

श्रीलता - अस्याः सङ्गीतकृतयः इतोऽपि सन्ति वा ?

अम्बा - बह्व्यः सन्ति । भजगोविन्दम्, विष्णुसहस्रनामस्तोत्रम्, हनुमान्चालीसा इत्यादीनि सन्ति । सुमधुरगात्रं, स्पष्टोच्चारणं, भक्तिभावः, निबद्धता इत्यादिभिः विशिष्टगुणैः अस्याः सङ्गीतकृतयः न केवलं भारते अपि तु पाश्चात्यदेशेष्वपि प्रचुरप्रचारं प्राप्तवत्यः । प्रतिभायाः निकषोपलानि खलु अस्याः बिरुदानि ! एषा भारतरत्न, पद्मभूषण्, पद्मविभूषण्, रामन् मेगसेसे इत्यादि-विविधबिरुदैः भारतसर्वकारेण वैदेशिकसर्वकारैश्च सम्मानिता । अस्यै महाभागायै विविध-विश्वविद्यालयैः अपि अनेके गौरवपुरस्काराः प्रदत्ताः ।

श्रीलता - तर्हि सङ्गीतकार्यक्रमैः गौरवपुरस्कारैः अधिकं धनमपि आर्जितवती इति मन्ये ।

अम्बा - सत्यम् । परन्तु स्वसङ्गीतकार्यक्रमैः आर्जितं धनं सा विविधसेवासंस्थाभ्यः व्यतरत् । तथैव केवलं वितरणार्थमेव द्विशतसङ्गीतकार्यक्रमान् कृत्वा न केवलं गानेन अपि तु वितरणेनापि लब्धप्रतिष्ठा श्रीमती एम्.एस्. सुब्बुलक्ष्मीमहोदया ।

अस्याः नाम्ना सर्वकारेण वैज्ञानिकसांस्कृतिकसंस्था अपि प्रारब्धा । कल्किनामिकां पत्रिकामपि सुब्बुलक्ष्मीः चालयति स्म । भारतीयसांस्कृतिकपरिरक्षिका एषा 2004 तमे वर्षे हृद्रोगेण बाधमाना, स्वगानमाधुर्येण देवानपि तोषयितुं दिवङ्गता ।

श्रीलता - अम्ब ! अविस्मरणीयम् अनुकरणीयञ्च खलु अस्याः विदुष्याः व्यक्तित्वम् ! अथ शीघ्रं पाठशालां गत्वा मम मित्राणि अपि एतान् सर्वान् विशेषान् श्रावयिष्यामि । गच्छामि तावत् ।



SCERT TELANGANA

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ. अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. भवन्तः सङ्गीतकार्यक्रमं श्रुतवन्तः किम् ?

२. सङ्गीते उपयुज्यमानानि कानिचन वाद्यसाधनानि वदन्तु ।

३. केषाञ्चन सङ्गीतकलाकोविदानां नामानि सूचयन्तु ।

४. कासाञ्चन गायिकानां नामानि वदन्तु ।

५. सङ्गीतश्रवणेन किं भवतीति सूचयन्तु ?

६. कुत्र सङ्गीतं कीर्तनानि च शृणोति ?

**आ. पाठे असमापकक्रियापदानि अन्विष्य तेषामधः रेखाङ्कनं कृत्वा अर्थान् जानन्तु ।**

**इ. अधः दत्तानां वाक्यानां समानार्थकवाक्यानि पाठे अन्विष्य लिखन्तु ।**

१. कर्णाटकसङ्गीते अत्यन्तं नैपुण्यं प्राप्तवती ।

२. कर्तव्यं दैवमाह्निकम् ।

३. विदेशेषु अपि भरतीयसंस्कृतिसौरभं प्रासारयत् ।

४. अस्याः नाम्ना सर्वकारेण संस्था स्थापिता ।

**ई. वाक्यानि पाठ्यानुसारं क्रमेण लिखन्तु ।**

१. पितुः प्रोत्साहेन बाल्ये एव अस्यां भक्तिभावाः प्रवर्धिताः ।

२. सा गायिका प्रमुखकर्णाटकसङ्गीतविदुषी एम्. एस्. सुब्बुलक्ष्मीमहोदया ।

३. त्रयोदशतमे वयसि एव सङ्गीतकार्यक्रमं कृतवती ।

४. अस्याः माता निरन्तररङ्गस्थलसङ्गीतकलाकोविदा ।

५. भारतरत्न, पद्माभूषण् इत्यादिबिरुदैः भारतसर्वकारेण सम्मानिता ।



SCERT TELANGANA

### उ. अधः दत्तं श्लोकं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

**छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे ।**
**फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव ॥**

१. वृक्षाः कुत्र तिष्ठन्ति ?

२. वृक्षाः अन्यस्य किं कुर्वन्ति ?

३. सत्पुरुषाः किं कुर्वन्ति ?

४. श्लोकस्य शीर्षिकां सूचयन्तु ।

५. वृक्षसत्पुरुषयोर्मध्ये किं साम्यं वर्तते ?

### ऊ. अधः दत्तानां प्रश्नानां समाधानानि पाठ्यांशाधारेण लिखन्तु ।

१. एम्.एस्. सुब्बुलक्ष्याः मातापितरौ कौ ?

२. सुब्बुलक्ष्मीः कस्मिन् वयसि सङ्गीतकार्यक्रमान् प्रारब्धवती ?

३. सुब्बुलक्ष्म्याः सम्पूर्णं नाम किम् ? सा कदा कुत्र जाता ?

४. सुब्बुलक्ष्मीः कस्यां - कस्यां भाषायां भक्तिसङ्गीतमालापितवती ?

५. सुब्बुलक्ष्म्या प्राप्ताः पुरस्काराः के ? तेषां नामानि लिखन्तु ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ. अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु।

१. सङ्गीतश्रवणेन उपयोगाः के ?

२. सङ्गीतसाधनान्युद्दिश्य पञ्चवाक्यानि लिखन्तु ।

३. सङ्गीतशास्त्रम् अध्येतुम् अवकाशः लब्धः चेत् भवान् तस्य उपयोगं कथं करोति ?

४. भवान् सङ्गीतकार्यक्रमं शृण्वन् काः अनुभूतीः विन्दति ।

### आ. अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. पाठ्यांशं स्वीयवाक्यैः लिखन्तु ।

२. 'सङ्गीतं कथं स्वास्थ्यवर्धकम्' इत्यंशमुद्दिश्य दशवाक्यानि लिखन्तु ।



SCERT TELANGANA

### इ. सर्जनात्मकतया समाधानानि लिखन्तु ।

१. सुब्बुलक्ष्मीमहोदयया गीतं किमपि गीतम् अभ्यस्य कक्षायां सस्वरं गायन्तु ।

२. अधः दत्तं परिच्छेदं संस्कृतभाषया अनुवदन्तु ।

లలితకళలు ముఖ్యంగా ఐదు (1) చిత్రలేఖనము, (2) శిల్పము, (3) సంగీతము, (4) కవిత్వము, (5) నాట్యము. ఈ ఐదింటిలో సంగీతం వినడమే ప్రధానంగా కలది. అందుకే దీనిని శ్రవ్యకళ అని అంటారు. సంగీతంలో స,రి,గ,మ,ప,ద,ని అనే సప్తస్వరాలు ఉంటాయి. సంగీతాన్ని విని శిశువు ఆనందిస్తాడు. పశుపక్ష్యాదులు కూడా సంగీతానికి పరవశులవుతాయి. సంగీతం ద్వారా కొన్ని రకాల రోగాలను నయం చేయవచ్చునని నిరూపించబడింది.

### ई. प्रशंसात्मकतया प्रतिस्पन्दनं कुर्वन्तु ।

१. सभायां संगीतकार्यक्रमं श्रुत्वा भवान् कथं प्रतिस्पन्दते ?

२. सङ्गीतकार्यक्रमस्य महत्त्वमुद्दिश्य मित्राय लेखं लिखतु ।

३. सङ्गीताभिवृद्धयै भवान् काः सूचनाः ददाति ?

## III. भाषांशाः

### 1. पदजालभिवृद्धिः

### अ. अधः लिखितेषु वाक्येषु रेखाङ्कितपदानां पर्यायपदानि लिखन्तु ।

१. धनात् धर्मं ततस्सुखम् । .................... .................

२. सर्वेषां माता एव प्रथमगुरुः। .................... ................

३. देवाः परमेश्वरं लोकसंरक्षणार्थं प्रार्थयामासुः । ............... ..............

४. कुन्दपुष्पस्य सौरभं बहुदूरं व्याप्नोति । ............... ...............

५. सर्वदा उत्तमकार्याणि शीघ्रं समापनीयानि । ............... .................

६. पिता कुटुम्बस्य पोषकः भवति ।

### आ. अधः लिखितवाक्येषु रेखाङ्कितपदानाम् अर्थं विज्ञाय स्वीयवाक्यैः लिखन्तु ।

१. विनयः सरस्वतीं नमस्कृत्य अध्ययनं करोति ।

२. सर्वे प्रातः दन्तधावनं कुर्वन्तु ।

३. कालिदासः उज्ञयिन्यां जन्म लेभे ।

४. विदुषां संसर्गः अत्यन्तं ज्ञानप्रदः ।

५. उत्तमगुणान् आबाल्यात् एव शिक्षेत ।

## 2. व्याकरणांशाः

### अ. अधः दत्तानि वाक्यानि पठन्तु । स्थूलाक्षरयुक्तानि पदानि परिशीलयन्तु ।

१. देवालये **धार्मिकः** कार्यक्रमः प्रचलति ।
२. **पौराणिकः** सुब्रह्मण्यः उपन्यासं ददाति ।
३. पुस्तकालये **साहित्यिकाः** ग्रन्थाः सन्ति ।
४. सम्प्रति देशस्य **आर्थिक**स्थितिः सन्तोषप्रदा ।
५. विद्यया **लौकिकी अलौकिकी** च उन्नतिः भवति ।
६. **दैनिकं** कार्यं मया आचरितम् ।

१. स्थूलाक्षरपदेषु समानतया श्रूयमाणाः वर्णाः के?
२. तेषां पदानां मूलशब्दाः के ?
३. मूलशब्देन इक / इकी / इकम् इत्यस्य योगेन शब्दे कुत्र, कः परिणामः अभवत् ?

**एतानि ठक्-प्रत्ययान्तरूपाणि ।**

- अत्र 'ठक्' प्रत्ययस्य स्थाने 'इक' भवति । प्रयोगे तु इक एव दृश्यते ।
  यथा - धर्म + ठक् = धार्मिकः (धर्ममाचरति इत्यर्थे)
- ठञ् प्रत्ययस्य स्थानेऽपि 'इक' आदेशः एव भवति ।
  यथा - दिन + ठञ् = दैनिकः
- ठक् / ठञ् प्रत्यये कृते मूलशब्दस्य आदिस्वरस्य वृद्धिः भवति ।
  यथा - अ - आ उ, ओ - औ
  इ, ए - ऐ; ऋ - आर् इति

### आ) उदाहरणानुसारेण इक (ठक् / ठञ्) प्रत्ययान्तपदानि रचयन्तु ।

| | मूलशब्दः | | | | पुं | स्त्री | न.पुं. |
|---|---|---|---|---|---|---|---|
| उदा - | सप्ताह | + | इक | - | साप्ताहिकः | साप्ताहिकी | साप्ताहिकम् |

| | | | | | |
|---|---|---|---|---|---|
| १. प्रकृति | + | इक | २. वेद | + | इक |
| ३. उद्योग | + | इक | ४. सेना | + | इक |
| ५. कल्पना | + | इक | ६. भूगोल | + | इक |
| ७. वर्ष | + | इक | ८. तत्त्व | + | इक |
| ९. अब्द | + | इक | | | |

**परियोजनाकार्यम्**

प्रसिद्धानां भारतीयसङ्गीतविदुषां नामानि विलिख्य ते कस्मिन् सङ्गीतभेदे प्रवीणाः इति लिखन्तु ।

**(अथवा)**

सङ्गीतसाधनानां चित्राणि सम्पाद्य भित्तिपत्रे स्थापयन्तु ।


SCERT TELANGANA

# ५.नाक्षिपेत् विपरीताङ्गान्

## पठन्तु, विचिन्त्य वदन्तु

शिक्षकः - सर्वे मानवाः जन्मप्रभृति बलिष्ठाः सुन्दराः सुकुमाराः न भवन्ति । केषाञ्चित् मानवानां जन्मतः अङ्गवैकल्यं नाम अन्धत्वं, मूकत्वं, बधिरत्वं वा भवति । केषाञ्चित् जनानाम् आघातवशात् वैकल्यं भवति । परन्तु ते बुद्धिबलेन धैर्येण च वैकल्यं जित्वा पुरोगामिनः भवन्ति । तेषां व्यक्तित्वम् अस्मान् उत्तेजयति । अतः हे छात्राः! एतत् सर्वं मनसि निधाय अस्माभिः प्रवर्तितव्यम् । इदानीं 'नाक्षिपेत् विपरीताङ्गान्' इति पाठे एतमेव अंशं पठामः ।

छात्राः - तथैव महोदय !

**प्रश्नाः ?**

१. जनानां वैकल्यं कथं भवतीति वदन्तु ।
२. केषाञ्चन विकलाङ्गानां नामानि वदन्तु ।
३. विकलाङ्गजनाः क्रीडन्ति वा ? किमपि साधयन्ति वेति वदन्तु ।

**उद्देश्यम्**

★ वैकल्यसत्त्वेऽपि मानसिकदृढत्वमावश्यकम् इति प्रेरणादानम् ।

**छात्रेभ्यः सूचनाः**

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।





SCERT TELANGANA

सर्वकारपाठशालायां नवमकक्ष्यायां छात्राः कोलाहलं कुर्वन्ति स्म । अत्रान्तरे समाजशास्त्राध्यापिका विजयलक्ष्मीमहोदया छात्रसाहाय्येन कक्ष्यायाः अन्तः प्राविशत् । सर्वे अध्यापिकां नमस्कृतवन्तः। तदा अध्यापिका नियतं पाठ्यांशं पाठयित्वा कोऽपि सन्देहः अस्ति चेत् पृच्छन्तु इति छात्रान् अपृच्छत् ।

तदा छात्रः रमणः उत्थाय ''मान्ये ! एकः सन्देहः अस्माकं मनस्सु चिरात् वर्तते । किन्तु प्रष्टुं सङ्कोचः जायते'' इत्यवदत् । 'किमर्थं सङ्कोचः? निर्भयं स्वेच्छया च वदे'ति अध्यापिकया समाश्वसितः । सः तामित्थम् अपृच्छत् - 'महाभागे ! पादयोः वक्रतायां (Polio) सत्यामपि भवती उच्चविद्याम् अधिगत्य गुरुस्थानं प्राप्तवती । तत्कथं साध्यमभवत् इत्येव अस्माकं सर्वेषां सन्देहः इति' ।

अध्यापिका दीर्घं निःश्वस्य वक्तुमारभत - ''मम जन्मस्थलं प्रकाशं जनपदे कश्चन कुग्रामः । तस्मिन् काले विद्युत्सौकर्यं वैद्यसौकर्यं वा नासीत् । मम पितरौ अशिक्षितौ आस्ताम् । मम सप्तमे वयसि एकः व्याधिः आगतः। ग्रामीणवैद्यस्य चिकित्सया किमपि फलं नाभवत् । वयं निर्धनाः अतः चिकित्सां प्राप्तुमशक्ताः। तत्समये मम पितुः प्रोत्साहनेन अहं पाठशालां प्रविष्टवती । प्रतिदिनं मम पिता स्वभुजौ माम् आरोप्य शालां नयति स्म । दशमकक्ष्यायां मण्डले प्रथमस्थाने उत्तीर्णाहं कलाशालायां प्रविष्टा अभवम् । मम उच्चविद्यायै मम पिता स्वगृहमपि विक्रीतवान् । इदानीम् अध्यापकवृत्तौ नियुक्ता अस्मि । मम औन्नत्यस्य कारणं मम पितरौ, मित्राणि अध्यापकाश्च। तेषाम् ऋणमुक्ता कदा भवामीति न जाने । मम अङ्गवैकल्यं मम वृत्तेः प्रतिबन्धकं कदापि न अभवत् । कुटुम्बजनानाम् आत्मीयसाहाय्येन मया विद्यार्जने वैकल्यप्रतिबन्धकः दूरीकृतः। वस्तुतः वैकल्यं शरीरस्य एव न तु मनसः। अहमेव न, प्रपञ्चे अनेके स्वकीयम् अङ्गवैकल्यम् अविगणय्य लब्धप्रतिष्ठाः अभवन् ।



सुधाचन्द्रन्

अस्मिन् विषये गणनीया भवति अस्मद्देशीया सुधाचन्द्रन् महाभागा । चेन्नैनगरे जाता सा प्रख्यातनृत्यकारिणी अभवत् । दुर्दैवात् एकस्यां दुर्घटनायां तस्याः दक्षिणपादः क्षतेः प्रणष्टः। तथापि सा अकुण्ठितदीक्षया कृत्रिमपादसाहाय्येन अद्यापि देशविदेशेषु नाट्यप्रदर्शनानि करोति । अनया विदुष्या अनेके पुरस्काराः प्राप्ताः । विश्वविख्यातिं गता । सा असकृत्

SCERT TELANGANA

दूरदर्शिन्यां हिन्दीविभागे प्रदर्शनं निर्वहति । स्वीयम् इतिवृत्तम् आधारीकृत्य आन्ध्रभाषायां 'मयूरी'ति नाम्ना निर्मिते चलनचित्रे सा एव नायिकास्थाने अभिनीतवती।



हेलेन् आडम्स् केल्लर्

अमेरिकादेशीया हेलेन् आडम्स् केल्लर् (Helen Adams Kellar) महाभागा मूका अन्धा च । तथापि सा अनेकग्रन्थानां रचयित्री, सामाजिककार्यकर्त्री अध्यापिका च अभवत् । सा ३९ देशेषु अनेकवारं सञ्चरितवती। जपान् जनानां सा प्रिया अभवत् ।

ईदृश एव दक्षिणकोरियादेशस्थः यम् डांग हैन् (Im Dong Hyun) अन्धस्सन्नपि धनुर्विद्यायां निपुणो जातः। बीजिंग् नगरे, एथेन्स् नगरे आयोजितासु ओलाम्पिक् क्रीडासु, तथैव जुलै २०१२ तमे वर्षे लण्डन् नगरे आयोजितायां ओलम्पिक् क्रीडायां च भागं गृहीत्वा प्रपञ्चविक्रमं (World Record) स्थापितवानस्ति । अस्य प्रतिभा सर्वैरनुसरणीया ।



यम् डांग हैन्



नटालीड्यू टोयट्

एवमेव दक्षिणाफ्रिकादेशीया नटालीड्यू टोयट् (Natale Du toit) पङ्गुः। पङ्गुरपि तरणस्पर्धायां (Swimming Competition) अनेकानि पदकानि प्राप्य जुलै २०१२ वर्षे लण्डन् नगरे आयोजितासु ओलम्पिक् क्रीडास्वपि भागं गृहीत्वा तत्र उत्तीर्णतां प्राप्तवती ।

एवम् अनेके तेषामङ्गवैकल्यानि विस्मृत्य स्वनिर्दिष्टकलासु निपुणाः भवन्ति । अतः मम प्रियतमाः छात्राः ! एतादृशान् दृष्ट्वा सहानुभूतिं मा प्रदर्शयन्तु । तेषाम् प्रोत्साहनं कुर्वन्तु'' इत्युक्त्वा तूष्णीमतिष्ठत् । सर्वे छात्राः तां करतालध्वनिभिः अभ्यनन्दन्।

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ. अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. 'वैकल्यं शरीरस्य न तु मनसः' इति विषयमुद्दिश्य चर्चां कुर्वन्तु ।

२. वैकल्यसत्त्वेऽपि समुन्नतिं प्राप्तवत्सु एकमधिकृत्य वदन्तु ।

३. चित्रं दर्शयित्वा एते विकलाङ्गाः किन्तु विजिताङ्गाः इति सोदाहरणं वदन्तु ।

**आ. अधः दत्तानां प्रश्नानां समाधानानि सूचनानुसारं लिखन्तु ।**

१. पाठं पठित्वा नामवाचकशब्दानाम् अधः रेखाङ्कनं कुर्वन्तु ।

२. पाठे आगतानां भारतेतरदेशीयानां नामानि लिखन्तु ।

**इ. यथोचितं योजयन्तु ।**

| | | |
|---|---|---|
| १. विजयलक्ष्मीः | रचयित्री | (   ) |
| २. सुधाचन्द्रन् | सन्यासी | (   ) |
| ३. समर्थरामदासः | अध्यापिका | (   ) |
| ४. हेलेन् केलर् | नर्तकी | (   ) |

**ई. अधः दत्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखन्तु ।**

यद्यपि संसारे बहूनि वस्तूनि सन्ति, परन्तु विद्यैव श्रेष्ठं धनमस्ति । अत एवोच्यते 'विद्याधनं सर्वधनप्रधानम्' । विद्यया मनुष्यः स्वकीयं कर्तव्यं जानाति यत् को धर्मः? कोऽधर्मः? किं कर्तव्यम् ?किमकर्तव्यम् ? किं पुण्यम् ? किं पापम् ? इति विद्ययैव जानाति । विद्यैव मानवं सन्मार्गेण नेतुं प्रभवति ।

१. सर्वश्रेष्ठं धनं किमस्ति ?

२. विद्यया स्वकीयं कर्तव्यं कः जानाति ?

३. बहूनि वस्तूनि कुत्र सन्ति ?

४. विद्या मानवं कुत्र नयति ?

**उ. अधः दत्तानां प्रश्नानां समाधानानि पाठमाधारीकृत्य लिखन्तु ।**

१. विजयलक्ष्मीः अङ्गविकला कथमभवत् ?

२. सा कथं विद्यामधीतवती ?

३. सुधाचन्द्रन् कथं स्वलक्ष्यं साधितवती ?

४. पाठे वर्णितानां क्रीडाकाराणां नामानि तेषां विशिष्टतां च लिखन्तु ।

SCERT TELANGANA

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ. अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. अङ्गवैकल्यवतां जनानां कृते सर्वकारः कीदृशं प्रोत्साहं ददाति इति लिखन्तु ।

२. पोलियोनिर्मूलनाय सर्वकारेण क्रियमाणां सेवां लिखन्तु ।

३. स्ववैकल्यमतीत्य क्रीडाकाराः कथं क्रीडासु निपुणाः भवन्ति इति आलोच्य लिखन्तु।

४. विजयलक्ष्मीः स्ववैकल्यमतिक्रम्य समुन्नतिं कथं प्राप्तवतीति लिखन्तु ।

### आ. अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. पाठस्य सारांशं स्वीयवाक्यैः लिखन्तु ।

२. ''वैकल्यं शरीरस्य न तु मनसः'' इति विषये एकं निबन्धं लिखन्तु ।

### इ. सर्जनात्मकतया समाधानानि लिखन्तु ।

१. 'एते न तु विकलाङ्गाः परन्तु विजिताङ्गाः' इति सूचयन्तः तैः साधितविशिष्टविषयान् क्रोडीकृत्य समाचारपट्टिकां रचयन्तु ।

### ई. अधः दत्तं परिच्छेदं संस्कृतभाषया अनुवदन्तु ।

భారతదేశమునకు రత్నగర్భ అని పేరు. అనగా రత్నములకు నిలయమని అర్థము. భారతదేశము నిర్జీవమైన రత్నములకే కాకుండా సజీవమైన రత్నములకు కూడా నిలయము. సజీవమైన రత్నములలో అగ్రగణ్యుడు వివేకానందుడు.

### उ. प्रशंसात्मकतया प्रतिस्पन्दनं कुर्वन्तु ।

विकलाङ्गानां कृते कीदृशप्रोत्साहकानि दातव्यानि इति वदन्तु ।

## III. भाषांशाः

### १. पदजालाभिवृद्धिः

### अ. कोष्ठे विद्यमानानि पदान्युपयुज्य यथोचितं रिक्तस्थानानि पूरयन्तु ।

| सहकारेण | लब्धप्रतिष्ठाः | भग्नः | दूरीकृतः |
|---|---|---|---|

१. कुटुम्बसहयोगेन वैकल्यप्रतिबन्धकः .................... ।

२. अङ्गवैकल्यम् अविगणय्य समाजे .................... अभवन् ।

३. सुधाचन्द्रन् महाभागायाः दक्षिणपादः .................... अभवत् ।

४. अध्यापकानां .................... अध्यापनवृत्तौ स्थितवती अस्मि ।

### आ. अधः दत्तानि पदानि उपयुज्य स्वीयवाक्यानि लिखन्तु ।

१. अत्रान्तरे  २. अन्तः  ३. अद्य  ४. चिरात्


SCERT TELANGANA

## २. व्याकरणांशाः

### अ. अधः दत्तानां धातूनां वर्तमानकाल-भविष्यत्काल-भूतकालरूपैः रिक्तस्थानानि पूरयन्तु।

१. माधुरी प्रश्नस्योत्तरं ..................... (वद् - वर्तमानकालः)

२. गीता प्रश्नस्योत्तरं ..................... ( वद् - भविष्यत्कालः)

३. रमेशः प्रश्नस्योत्तरं ..................... ( वद् - भूतकालः)

४. किरणः ग्रामान्तरं ..................... ( गम् - वर्तमानकालः)

५. कृष्णः ग्रामान्तरं ..................... (गम् - भविष्यत्कालः)

६. महेशः ग्रामान्तरं ..................... (गम् - भूतकालः)

### आ. एतानि वाक्यानि पठन्तु ।

१. शिशुपालवधं मल्लिनाथष्टीकते ।

२. रामायणस्य बृहट्टीका अस्ति ।

३. एतड्ढक्का डं डमिति वदति ।

उपरि दत्तेषु वाक्येषु सन्धिपदानि परिशीलयन्तु ।

| | | | | |
|---|---|---|---|---|
| १. मल्लिनाथष्टीकते | = | मल्लिनाथस् | + टीकते | (स् + ट = ष्ट) |
| २. बृहट्टीका | = | बृहत् | + टीका | (त् + ट = ट्ट) |
| ३. एतड्ढक्का | = | एतद् | + ढक्का | (द् + ड् = ड्ढ) |

उपरि दत्तेषु उदाहरणेषु

सकारस्य टकारयोगे सकारस्य स्थाने 'ष' वर्णः आगतः ।

तकारस्य टकारयोगे तकारस्य स्थाने 'ट' वर्णः आगतः ।

दकारस्य डकारे योगे दकारस्य स्थाने 'ड' वर्णः आगतः ।

''सकारतवर्गयोः षकारटवर्गाभ्यां योगे, सकारतवर्गयोः स्थाने षकारटवर्गौ स्तः'' ।

**अयं 'ष्टुत्वसन्धिः' इत्युच्यते ।**

ष्टु = ष् , ट्, ठ्, ड्, ढ्, ण्

सूत्रम् - **स्तोः ष्टुना ष्टुः**

स्तोः ष्टुना योगे ष्टुः स्यात् ।

**अर्थात् सकारस्य षकारटवर्गाभ्यां योगे सकारस्य षकारः तवर्गस्य षकारटवर्गाभ्यां योगे तवर्गस्य क्रमात् टवर्गः आदेशो भवति ।**



SCERT TELANGANA

## इ. अधः दत्तेषु उदाहरणेषु सूत्रार्थस्य समन्वयम् अवगच्छन्तु ।

**1. स् + ष / टवर्गः = ष्**

1. बालस् + षष्ठः = बाल + ष् + षष्ठः = बालष्षष्ठः (स् = ष्)

2. टवर्गस् + टादिः = टवर्ग + ष् + टादिः = टवर्गष्टादिः (स् = ष्)

3. धनुस् + टङ्कारः = धनु + ष् + टङ्कारः = धनुष्टङ्कारः (स् = ष्)

**2. तवर्गः + टवर्गः = टवर्गः**

1. तद् + डमरुः = त + ड् + डमरुः = तड्डमरुः । (द् = ड्)

2. चक्रिन् + ढौकसे = चक्रि + ण् + ढौकसे = चक्रिण्ढौकसे ।(न् = ण्)

**3. ष् + तवर्गः = टवर्गः**

1. आकृष् + तः = आकृष्+ ट् + अः = आकृष्टः (त् = ट्)

2. इष् + तः = इष् + ट् + अः = इष्टः (त् = ट्)

**4. टवर्गः + तवर्गः = टवर्गः**

1. षण् + नाम् = षण् + ण् + आम् = षण्णाम् (न् = ण्)

## ई. अधः दत्तानि सन्धिकार्याणि कुर्वन्तु ।

### १. सन्धिं कुर्वन्तु ।

1. तत् + टीका
2. उद् + डयनम्
3. स्याद् + ढक्का
4. उत् + टङ्कनम्
5. शरद् + डम्बरः

### २. विसन्धिं कुर्वन्तु ।

1. सट्टिप्पणी
2. कतमष्टकारः
3. बृहड्डिण्डिमः
4. असकृड्डयनम्

### परियोजनाकार्यम्

१. स्ववैकल्यं दूरीकृत्य अत्युन्नतस्थाने विद्यमानानां महानुभावानां जीवनविशेषान् सङ्गृह्य सञ्चिकां सज्जीकृत्य दर्शयन्तु ।

(अथवा)

२. स्टीफेन् हाकिंग् अधिकृत्य सूचनाः सङ्गृह्य भित्तिपत्रिकायां लेपयित्वा प्रदर्शयन्तु ।



SCERT TELANGANA

# ६.चिरायुषा वर्धस्व

द्वितीयः भागः

## पठन्तु, विचिन्त्य वदन्तु

अध्यापकः - युष्माकं गृहे कीदृशानि लोहपात्राणि कथम् उपयुज्यन्ते ?

माधवी - रजतपात्रेण अहं नित्यं क्षीरं पिबामि ।

स्वाती - मम पितामहः कांस्यपात्रेण जलं पिबति ।

ज्योती - मम माता अयः (Stainless steel) पात्रेण पाकं करोति ।

अध्यापकः - तथैव काचपात्राणि च नित्यम् उपयुज्यन्ते । किन्तु तानि सर्वाणि अस्माकम् उपयोगाय भवन्ति, न तु हानिकराणि ।

महेशः - हानिकराणि इत्युक्ते कोऽर्थः महाशय !

अध्यापकः - कानिचन वस्तूनि अस्माकं हानिं जनयन्ति । तद्विषये अद्य पाठं पठामः ।

**प्रश्नाः ?**

1. उपरितनसम्भाषणे उपयुक्तानि पात्राणि कानि ?
2. भवतः गृहे उपयुज्यमानानां पात्राणां वस्तूनां च नामानि वदन्तु ।
3. अस्माभिः उपयुज्यमानेषु वस्तुषु पात्रेषु च कानि हानिं जनयन्ति ? तानि कैः निर्मितानि भवन्ति इति वदन्तु ।

**उद्देश्यम्**

★ नित्यजीवनोपयोगिपात्राणां गुणपरिचयः ।

★ वस्तूनाम् उपयोगे जागरूकतायाः वर्धनम् ।

★ प्लास्तिकस्य अनुपयोगविषये प्रेरणम् ।

### छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

दुर्गा नवमकक्ष्यायां पठति । तस्यै विद्यालये विज्ञानशास्त्रकालांशे काचित् परियोजना दत्ता । गृहे तां परियोजनां समाप्य विलम्बेन निद्रामग्ना अभवत् । निद्रायां सा स्वप्नमेकम् अपश्यत् ।

स्वप्ने तया एकः बृहदवकरकण्डोलः (Dust Bin) दृष्टः । तस्मिन् केचन विसृष्टाः पदार्थाः कोलाहलं कुर्वन्ति ।

''अहं प्रथमं, त्वं मम पृष्ठतः एव'' एकेनोक्तम् । ''नैव, नैव, आवाम् एकस्मिन्नेव समये'' इति अन्यः वदति । तदा नीलवर्णकिरीटं धृत्वा, धूसरवर्णपटलोपेतः कश्चन वृद्धः तत्रागच्छत् । सर्वानुद्दिश्य सः उच्चैः ''मौनेन तिष्ठन्तु । एकैकः क्रमशः वदति चेत् सर्वे श्रोतुं शक्नुमः'' इत्युक्तवान् ।

तदा तेषु पदार्थेषु अन्यतमा एका कदलीत्वक् ''अहमेवं वदन्ती भवतः सर्वान् दुःखयामि। अहं पृथ्वीं प्रविश्य दशदिनाभ्यन्तरे एव मृत्तिकारूपं प्राप्स्यामि । पुनः रूपान्तरेण नरान् मोदयिष्यामि । एतत्कारणतः अहं महान्तं सन्तोषं विन्दामि । तदा इक्षुः ''अहं मासानन्तरं तादृशीं स्थितिं प्राप्स्यामि'' इति अवदत् ।



तथा सूत्रम् कागदस्यूतञ्च ''आवां चतुर्षु मासेषु भवन्तौ अनुसरावः'' इति स्वाभिप्रायम् अवदताम् । तदा नारङ्गत्वक् '' अहं तु षण्मासानाम् अनन्तरमेव मृत्तिकारूपं प्राप्तुं शक्नोमि'' इति अवदत् । रज्जुः एवं वदति '' इदानीं तु अहं निस्सारः एव । नराः माम् अमुञ्चन् । परन्तु मृत्तिकारूपं प्राप्तुं मह्यम् एकं वर्षमावश्यकम्'' इति ।

एतानि वाक्यानि शृण्वत्यौ उज्झितक्षीरपुटी - शीतलपानीयपुट्यौ ''आवां भवतां सन्तोषवचनानि श्रुत्वा खिद्यावः। आवयोः दुःस्थितिः तादृशी । मृत्तिकारूपं प्राप्तुम् आवाभ्यां पञ्चवर्षपर्यन्तं निरीक्षणं करणीयम्'' इति अवदताम् ।

''ममापेक्षया वरमेव खलु ! मया तु तादृशस्थितिं प्राप्तुं पञ्चविंशतिवर्षाणि निरीक्षणीयानि'' इति म्लानवदनेन त्वङ्निर्मितपादत्राणं दीर्घं निश्वस्य अवोचत् । कांस्यपात्रस्य खण्डमपि ''मम आयुः इतोऽपि शतवर्षाणीति वेदनां प्राकटयत् ।

तदा खण्डितशिरस्का काचकूपी ''भवतां सर्वाणि शरीराणि धन्यानि । तदर्थम् अहं तु न खिद्यामि। यः मानवः स्वसौख्यार्थं मां निर्मितवान्, मां निर्दयं भग्नां कृत्वा स एव भूमौ क्षिप्तवान् । अहो! अहं दशलक्षमितवर्षाणि यावत् मृत्तिकारूपं न प्राप्नोमि खलु ! ईदृशीं स्थितिं चिन्तयन्त्याः मम हृदयं प्रतीकारेच्छापूर्णम् अभवत् । तदर्थम् अहं मम शरीरं खण्डं खण्डं कृत्वा सर्वत्र शिलीमुखरूपैः व्याप्नोमि । तदैव तेषां मूर्खनराणां पादान् विदीर्य, तान् दुःखयितुं प्रयत्नं करिष्ये'' तानि वचनानि श्रुत्वा सर्वेऽपि विसृष्टपदार्थाः परस्परकरताडनेन सन्तोषं प्रकटयन्ति । एतस्मिन्नन्तरे एकं सुश्राव्यगीतालापनं श्रूयते ।

'' चिरं जीवामि अहमेव, वरं नरस्याहमेव,

अन्तर्बहिः अहमेव, अन्तर्जाले अहमेव,

विभिन्नरूपं ममैव, सकलगृहेषु अहमेव,

अनन्तव्याप्तम् अहमेव, देवेनाहं सम एव,

देवं विनापि अहमस्मि, मां विना तु कोऽप्यस्ति ?

चिरं जीवामि अहमेव''।

एवं गायत् प्लास्तिकम् (PLASTIC) प्राविशत् । ''हे मित्राणि ! भवन्तः सर्वे कुशलिनः वा ? भवतामपेक्षया अहं कनिष्ठः खलु ! आशीर्वचनं ददतु'' इत्युक्तवत् ।

सर्वेऽपि मनस्सु एव हसन्तः एवं वदन्ति । ''पापिन् ! चिरायुषा वर्धस्व !'' तद्वचनं श्रुत्वा खिन्नं प्लास्तिकम् स्वशिरः अवनम्य ततः निर्गच्छति ।

तत् बहिरागत्य एवमचिन्तयत् - '' ते किमर्थम् ईदृशान् आशीर्वादान् दत्तवन्तः? किमहं नरात् वरं न भवामि वा ? किं वा शापोऽहं तस्य ? कथं ? कथं ?? कथम् ???

दुर्गायाः स्वप्नभङ्गः जातः । समयः दृष्टः तया । उषःकाले पञ्चवादनम् । सा दशनिमेषपर्यन्तं दृष्टं स्वप्नमधिकृत्य चिन्तितवती । झटिति उत्थाय नूतनं स्वीयपरियोजनाकार्यम् आरब्धवती । तस्य शीर्षिका तु ''प्लास्तिकस्य अविलीनता - हानयश्च'' इति ।


SCERT TELANGANA

# एतानि कुर्वन्तु

## I. भावावगमनम् - प्रतिस्पन्दनम्

### अ. अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।

१. प्लास्तिकस्य अधिकतया उपयोगे कारणानि कानि ?

२. कक्ष्यां समूहद्वयेन विभज्य प्रथमसमूहः प्लास्तिकस्य उपयोगं समर्थयन् द्वितीयः समूहः तद्विरुध्य चर्चयेताम् ।

३. त्वया अनुभूतं स्वप्नमुद्दिश्य वदन्तु ?

### आ. अधः दत्तानि पदानि पठित्वा पाठे स्थितं सम्पूर्णवाक्यं लिखन्तु ।

१. कोलाहलं - ....................................................... ।

२. इक्षुः - ....................................................... ।

३. दुःस्थितिः - ....................................................... ।

४. सुश्राव्यगीतालापनम् - ....................................................... ।

५. पञ्चवादनम् - ....................................................... ।

### इ. अधः दत्तानि वाक्यानि केन उक्तानि इति लिखन्तु ।

१. ''अहं मासानन्तरं तादृशीं स्थितिं प्राप्स्यामि'' ।

२. ''आवां चतुर्षु मासेषु भवन्तौ अनुसरावः'' ।

३. ''अहं दशलक्षमितवर्षाणि यावत् मृत्तिकारूपं न प्राप्नोमि खलु !''

४. ''पापिन् । चिरायुषा वर्धस्व !''

### ई. पाठं पठित्वा रिक्तस्थानानि पूरयन्तु ।

१. एकैकः क्रमशः वदति चेत् .................।

२. इदानीं तु अहं .................।

३. भवतां सर्वाणि .................।

४. हे मित्राणि! .................।

### उ. अधः दत्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखन्तु ।

अद्यतनकाले कालुष्यव्याप्तिः सर्वत्र दृश्यते । कालुष्यनिवारणाय वृक्षाणां संरक्षणं कार्यम् । अधुना वृक्षाणां सङ्ख्या न्यूना सञ्जायते । एषा हि शोचनीया स्थितिः । सम्प्रति हरितवृक्षाणां महती आवश्यकता । अस्माकं जीवनं सर्वं वृक्षैः सुसम्बद्धं खलु ! वृक्षजीवने अस्माकं जीवनं, रक्षणे अस्माकं च रक्षणमिति न विस्मर्तव्यम् । अतः आत्मनः जीवनं रक्षितुं अस्माभिः वृक्षाः रक्षणीयाः ।

**वृक्षो रक्षति रक्षितः ।**

१. केषां सङ्ख्या प्रतिदिनम् न्यूना सञ्जायते ?

२. वृक्षाश्रितं किम् अस्ति ?

३. कीदृशानां वृक्षाणां महती आवश्यकता विद्यते ?

४. जीवनं रक्षितुं के रक्षणीयाः?

### ऊ. अधः दत्तानां प्रश्नानां समाधानानि पाठमाधारीकृत्य लिखन्तु ।

१. कदलीत्वक् कदा मृत्तिकारूपं प्राप्नोति ?

२. मृत्तिकारूपं प्राप्तुं कस्य पदार्थस्य पञ्चविंशतिवर्षाणि भवन्ति ?

३. रज्जुः कियता कालेन मृत्तिकारूपं प्राप्नोति ?

४. चतुर्षु मासेषु कौ कदलीत्वचम् अनुसरतः?

५. बृहदवकरकण्डोले के के आसन् ?

६. कः किमर्थं महान्तं सन्तोषं विन्दति ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ. अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. काचकूपी किमर्थं प्रतीकारेच्छापूर्णा अभवत् ?

२. सर्वेऽपि प्लास्तिकाय किम् आशीर्वचनं दत्तवन्तः? किमर्थम् ?

३. सम्प्रति अस्माभिः उपयुज्यमानानां प्लास्तिकवस्तूनां स्थाने कानि वस्तूनि उपयोक्तव्यानि? लिखन्तु ।

### आ. अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. भवतः पाठशालायां प्लास्तिकवस्तूनां विनियोगविषये एका गोष्ठी प्रचलिष्यति । तत्समये भवान् किं वदिष्यति ?

२. प्लास्तिकवस्तूनां विनियोगः किमर्थं हानिकरः भवति ?


SCERT TELANGANA

### इ. सर्जनात्मकतया समाधानानि लिखन्तु।

१. प्लास्तिकस्यूतानां विनियोगस्य स्थगनम् अभ्यर्थयन् जनान् उद्दिश्य करपत्रमेकं लिखन्तु ।

२. अधः दत्तं परिच्छेदं संस्कृतभाषया अनुवदन्तु ।

శ్రీమద్భగవద్గీత మహాభారతంలోని భీష్మ పర్వంలోని అంశం. దీనిలో పదునెనిమిది అధ్యాయాలు ఏడువందల శ్లోకాలు ఉన్నాయి. ఇది కేవలం ధర్మాన్ని బోధించే గ్రంథమే కాదు. ఆధునిక జీవనంలోని ఆచారాలు కూడ దీనిలో ఉన్నాయి. భగవద్గీత లోకవ్యవహారాన్ని, ఆధ్యాత్మిక మార్గాన్ని నిర్దేశిస్తుంది. ఈ గీతా శాస్త్రంలో కర్మ, జ్ఞాన, ధ్యాన, యోగ సంబంధమైన అనేక విషయాలు ఉన్నాయి. జాతులు, వర్గాలు, సంప్రదాయాలకు సంబంధించిన విచారము ఇందులో కనపడదు.

### ई. प्रशंसात्मकतया प्रतिस्पन्दनं कुर्वन्तु ।

'प्रकृतिः रक्षति रक्षिता' एतद्विषये भवतः अभिप्रायं वदतु ।

## III. भाषांशाः

### १. पदजालाभिवृद्धिः

### अ. अधः दत्तानां पदानां समानार्थकपदानि ज्ञात्वा वाक्यानि लिखन्तु ।

**उदा** - विलम्बः - आलस्यम् - कर्मणि विलम्बः हानिकरः भवति ।

१. भूमिः - ................ - ..................................

२. मनुजः - ................ - ..................................

३. मृत् - ................ - ..................................

### आ. पाठस्य आधारेण रिक्तस्थानेषु सम्बद्धवस्तूनि लिखन्तु ।

१. दशदिनाभ्यन्तरे एव मृत्तिकारूपं प्राप्नोति । (          )

२. षण्मासानन्तरमेव मृत्तिकारूपं प्राप्नोति । (          )

३. एकवर्षे मृत्तिकारूपं प्राप्नोति । (          )

४. मृत्तिकारूपं प्राप्तुं पञ्चविंशतिवर्षाणि निरीक्षमाणं वस्तु । (          )


SCERT TELANGANA

## २. व्याकरणांशाः

### अ. सन्धिं कुर्वन्तु - सन्धिनाम निर्दिशन्तु ।

| | | | | |
|---|---|---|---|---|
| १. न | + | एव | - | ................ |
| २. इति | + | उक्तवान् | - | ................ |
| ३. सर्वे | + | अपि | - | ................ |
| ४. मास | + | अनन्तरम् | - | ................ |
| ५. प्रतीकार | + | इच्छा | - | ................ |
| ६. अन्तः | + | बहिः | - | ................ |
| ७. विना | + | अपि | - | ................ |

### आ. विसन्धिं कुर्वन्तु - सन्धिनाम निर्दिशन्तु ।

१. एकेनोक्तम् - ................

२. रूपान्तरम् - ................

३. ममापेक्षया - ................

४. इतोऽपि - ................

५. सौख्यार्थम् - ................

६. देवेनाहं - ................

७. इत्युक्तम् - ................

### इ. अधः दत्तानि वाक्यानि पठन्तु ।

१. **गुणी** गुणिनं वेत्ति ।

२. कर्मशीलः **योगी** कथ्यते ।

३. **लोभी** शान्तिं न प्राप्नोति ।

४. सर्वे भवन्तु **सुखिनः** ।

उपर्युक्तवाक्येषु स्थूलाक्षराणि पदानि **इनि प्रत्ययान्तानि** इनि(इन्) प्रत्ययः सञ्ज्ञाशब्दात् युक्त इत्यर्थे भवति । यथा गुण+इनि(इन्) = गुणी, गुणयुक्तः इत्यर्थः। गुणाः अस्य सन्तीति ।

इन् प्रत्ययान्तपदानि विशेषणपदानि सन्ति । अतः एतेषां रूपाणि त्रिषु लिङ्गेषु भवन्ति।

| | | |
|---|---|---|
| १. गुणी - | गुणयुक्तः। | गुणाः अस्य सन्तीति । |
| २. सुखी - | सुखयुक्तः। | सुखानि अस्य सन्तीति । |

SCERT TELANGANA

### उ. अधः लिखितां तालिकां पूरयन्तु ।

| शब्दः + प्रत्ययः | रूपाणि | पु | स्त्री | न.पुं |
|---|---|---|---|---|
| **उदा -** संसार + इन् | संसारिन् | संसारी | संसारिणी | संसारि |
| १. मान + इन् | मानिन् | ........... | ........... | ........... |
| २. प्राण + इन् | प्राणिन् | ........... | ........... | ........... |
| ३. देह + इन् | देहिन् | ........... | ........... | ........... |
| ४. क्रोध + इन् | क्रोधिन् | ........... | ........... | ........... |
| ५. विनोद + इन् | विनोदिन् | ........... | ........... | ........... |

### ऊ. अधः दत्तेषु वाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ विभज्य समाधानं प्रदत्तविकल्पेभ्यः चित्वा लिखन्तु ।

१. **धनी** जनः दानेन शोभते । - .....................

(अ) धन् + ई (आ) धन + इनी

(इ) धन + इनि (ई) धनिन् + ई

२. संस्कृतसाहित्यजगति **दण्डी** सुप्रसिद्धः कविः। - .....................

(अ) दण्डि + इनि (आ) दण्डी + इनि

(इ) दण्ड + इनी (ई) दण्ड + इनि

३. शतेषु एकः **सुकृती** जायते । - .....................

(अ) सुकृत + इनी (आ) सुकृत + इनि

(इ) सुकृति + इनि (ई) सुकृती + इनि

**परियोजनाकार्यम्**

केषां पदार्थानां मृत्तिकारूपं प्राप्तुं कियान् समयः भवतीति पट्टिकारूपेण विलिख्य कक्ष्याप्रकोष्ठे प्रदर्शयन्तु ।

**अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।**

SCERT TELANGANA

# ७. आतिथ्यम्

## चित्रं पश्यन्तु, विचिन्त्य वदन्तु



**प्रश्नाः ?**

1. चित्रे किं दृश्यते ?
2. चित्रे स्थिताः जनाः किं किं कुर्वन्ति ?
3. चित्रं दृष्ट्वा किम् अवगतवान् ?

## नेपथ्यम्

★ भारतीयसंस्कृतौ अतिथिसत्कारः प्रधानविषयः । ''अतिथिदेवो भव'' इति उपनिषद्वाक्यम् । अतिथिं दैवमिति मत्वा सम्मानं कुर्यात् इत्यर्थः । ईदृशवाक्यम् आजीवनम् आचरितवतः महापुरुषस्य रन्तिदेवस्य चरितं महाभारते, भागवतेऽपि लिखितमस्ति ।

तस्य दातृत्वगुणं छात्राः जानन्तु इति उद्देश्येन, तस्य चरितम् पाठ्यांशरूपेणात्र स्वीकृतम् ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।





SCERT TELANGANA

(भरतवंशीयेषु राजसु रन्तिदेवः महान् उदारः । सः राजा समस्तं दानरूपेण दत्त्वा दारिद्र्यमनुभवन् सकुटुम्बं वने वसति स्म । एकस्मिन् दिने ........)

राजपत्नी - प्रभो ! पादौ प्रक्षाल्य आगच्छतु । भगवदनुग्रहेण अद्य खादितुम् आहारः लब्धः । पातुं जलमपि प्राप्तम् । सत्वरं सपुत्रः आगच्छतु ।

रन्तिदेवः - देवि ! एष एव प्रसादः । क्षणकालं तिष्ठ । अतिथिदेवाय प्रतीक्षां कुर्वः । ''केवलाघो भवति केवलादी'' इति शृतिवाक्यम् । यः अतिथये अदत्त्वा खादति सः पापं खादतीति शास्त्रनियमः भवत्या ज्ञातपूर्व एव । अतः अतिथिं विना कथम् ?

राजपत्नी - अस्तु स्वामिन् !

भिक्षुकः - (आगत्य) भवति भिक्षां देहि ! क्षुधा माम् अतीव बाधते ।
मातः मम उदरपूरणाय .............

रन्तिदेवः - (ससन्तोषम्)

**अभ्यागतो ज्ञातपूर्वः अज्ञातोऽतिथिरुच्यते ।**
**तयोः पूजां द्विजः कुर्यादिति पौराणिकी स्मृतिः ॥**

इदानीम् अतिथिः आगतवान् ।

राजपत्नी - (स्वीकुरु) (अन्ने अर्धभागं भिक्षुकाय ददाति) प्रभो ! भोजनार्थं पुत्रेण सह आगच्छतु भवान् (यदा ........ उपक्रमते.............)



ब्राह्मणः - जननि ! भिक्षां देहि ? (उच्चैः)

राजपत्नी - तिष्ठतु क्षणम् (ओदनं द्विधा विभज्य एकं भागम् आनीय) स्वीकरोतु भवान् ।

निषादः - (आगत्य) अम्ब ! ओदनं खादित्वा एकसप्ताहकालः अभवत् । किञ्चित् ददातु ।

राजपत्नी - अये ! स्वीकुरु । (ओदनं सर्वं ददाति)

रन्तिदेवः - देवि । सुकार्यं कृतवती ।

**अतिथिर्यत्र भग्नाशो गृहात् प्रतिनिवर्तते ।**
**स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥**

अतिथिः निराहारेण गृहात् गच्छति चेत् सः स्वकीयं पापं दत्त्वा अस्माकं पुण्यमादाय गच्छतीति आर्योक्तिः । एतादृशात् दोषात् वयं विमुक्ताः ।

राजपत्नी - इदानीं केवलं जलपानं कुर्याम ।

पथिकः - अम्ब ! बहु पिपासा अस्ति । किञ्चित् जलं ददातु ।

राजपत्नी - स्वीकुरु (तस्मै जलं ददाति) ।

रन्तिदेवः - कल्याणि ! तव साहचर्यं मम भाग्यवशात् लब्धम् । मम मनोभावं ज्ञात्वा आचरसि त्वम्। अत एव वदन्ति ............

**अर्धं भार्या मनुष्यस्य भार्या श्रेष्ठतमा सखी ।**
**भार्यामूलं त्रिवर्गस्य भार्यामूलं तरिष्यतः ॥** इति ।

एतत् सत्यम् । अत एव 'अर्धाङ्गी' इति पदं सार्थकं भवति । भवती सुखदुःखेषु मम सखी एव । यद्यत् करोमि तत्तत् सर्वं सफलं भवति । कारणं तव सहयोग एव । धन्योऽस्मि देवि । (सानन्दं)

भिक्षुकः - (प्रविश्य) अम्ब ! बुभुक्षापीडितः अस्मि ।

राजपत्नी - इदानीं कर्तव्यं ............... (प्रश्नार्थकेन भर्तारं दृष्ट्वा)

रन्तिदेवः - दैवं प्रार्थयामि ..........

**न त्वहं कामये राज्यं न स्वर्गं नापुनर्भवम् ।**
**कामये दुःखतप्तानां प्राणिनामार्तिनाशनम् ॥**

ब्रह्मादिदेवाः - प्रत्यक्षीभूय राजन् । तव अतिथिसेवातत्परतया निःस्वार्थदानगुणेन च वयं सन्तुष्टाः । वरं वृणीष्व ।

रन्तिदेवः - मम एतदेवाभीष्टम् ।

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।**
**सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाग्भवेत् ॥**

देवाः - "तथास्तु" अहो धन्यो भवान् । चिरकीर्तिर्भव ।

(रन्तिदेवः, तस्य पत्नीपुत्रादयः, मोक्षमार्गे प्रस्थिताः)



SCERT TELANGANA

## कविपरिचयः

व्यासमहर्षिणा विरचिते भागवते भारते च रन्तिदेवचरितमस्ति । व्यासस्य पूर्णनाम कृष्णद्वैपायनः, वेदविभजनं कृतवानिति तस्य वेदव्यासः इत्यपि नाम ।

व्यासः अष्टादशपुराणानि, अष्टादशपर्वात्मकं महाभारतम्, भागवतादिविविधग्रन्थान् व्यरचयत् । अस्मिन् पाठ्यांशे महाभारते स्थिता रन्तिदेवकथा सम्भाषणरूपेण प्रस्तुता ।

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ. अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. भवतः गृहम् आगतानाम् अतिथीनां मर्यादां भवन्तः कथं कुर्वन्ति ?

२. रन्तिदेवः सर्वस्वं दानं कृतवान् । भवन्तः कदापि किमपि दानं कृतवन्तः किम् ?

३. अतिथयः नाम के ?

४. आतिथ्यं नाम किम् ?

५. पाठ्यांशे कस्य पात्रं भवते रोचते ? किमर्थम् ?

**आ. पाठं पठित्वा पाठे स्थितानि सम्बोधनार्थकपदानि, क्रियापदानि अन्विष्य तेषामधः रेखाङ्कनं कुर्वन्तु । तेषाम् अर्थान् जानन्तु ।**

**इ. अधः दत्तानि वाक्यानि कः कं प्रति उक्तवानिति लिखन्तु ।**

१. केवलाघो भवति केवलादी ।

२. क्षुधा माम् अतीव बाधते ।

३. सः स्वकीयं पापं दत्त्वा अस्माकं पुण्यम् आदाय गच्छति ।

४. 'अर्धाङ्गी' इति पदं सार्थकं भवति ।

५. वरं वृणीष्व ।

**ई. अधः दत्तं परिच्छेदं पठित्वा समाधानानि लिखन्तु ।**

पूर्वम् अन्धकासुरो नाम राक्षसः देवताभ्यः वरं प्राप्य दुर्जयः सन् भूलोके जनान् विशेषतः पीडयति स्म । कोऽपि देवः तं सम्मुखीकर्तुं संहर्तुं वा न शक्तवान् आसीत् । अथ कदाचित् सर्वे देवाः सम्भूय निर्णीतवन्तः यत् सर्वे देवाः स्वशक्तेः कञ्चित् अंशं दद्युः । "ततः



SCERT TELANGANA

समुदितशक्तेः प्रयोगेण अन्धकासुरः मारणीयः'' इति । ततः सर्वे देवाः स्वस्य अंशं दत्तवन्तः । ब्रह्मणः शक्तेः अंशतः ब्राह्मी सृष्टा । महेश्वरस्य अंशतः 'माहेश्वरी' समुद्भूता । कुमारस्य (सुब्रह्मण्यस्य) अंशतः 'कौमारी' समुत्पन्ना । विष्णोः अंशतः वैष्णवी निर्मिता । यमस्य अंशतः ''वाराही'' समुत्पन्ना अभवत् । इन्द्रस्य अंशतः 'इन्द्राणी' विनिर्मिता । महारुद्रस्य अंशतः 'चामुण्डा' उत्पन्ना । एताः सप्तशक्तयः सम्भूय लोककण्टकम् अन्धकासुरं नाशितवत्यः ।

१. अन्धकासुरं काः नाशितवत्यः ?

२. एताः सप्तशक्तयः केषां सन्ति ?

३. महेश्वरस्य अंशतः का समुद्भूता ?

४. वाराही कस्मात् अंशात् निर्मिता ?

५. वैष्णवी शक्तिः कस्य अंशा ?

६. सप्तशक्तीनां नामानि लिखन्तु ?

### उ. पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. अर्धाङ्गी इति पदं कथं सार्थकं भवति ?

२. भोजनप्राप्ते रन्तिदेवः कस्य प्रतीक्षां कृतवान् ? किमर्थम् ?

३. राजपत्नी कस्मै किं किं दत्तवती ?

४. अतिथिः निराशया किमर्थं न गच्छेत् ?

५. रन्तिदेवस्य गृहं प्रति के के आगताः? ते किं किं पृष्टवन्तः ?

६. रन्तिदेवः केन श्लोकेन देवं प्रार्थितवान् तस्य भावः कः ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ. अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. भवन्तः अतिथीनाम् आगमने किं करिष्यन्ति ?

२. अस्याः कथायाः शीर्षिका समीचीना वा ? किमर्थं ? कारणानि लिखन्तु ।

३. पाठ्यकथांशाधारेण गृहीतव्याः सुगुणाः के ?

४. पाठे स्थितान् श्लोकान् सम्यक् पठित्वा तेषां भावान् स्वीयवाक्यैः लिखन्तु ।

५. कीदृशेभ्यः याचकेभ्यः दानं कर्तव्यम् इति भावयन्ति? लिखन्तु ?



SCERT TELANGANA

### आ. अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. 'दातृत्ववैशिष्ट्यं' इति शीर्षिकया निबन्धमेकं लिखन्तु ।

२. पाठ्यांशसारांशं स्वीयवाक्यैः लिखन्तु ।

### इ. सर्जनात्मकतया समाधानानि लिखन्तु ।

१. सम्भाषणात्मकमिदं पाठं कथारूपेण लिखन्तु ।

२. अधः दत्तपरिच्छेदं संस्कृतभाषया अनुवदन्तु ।

పూర్వం ఆంధ్రదేశంలో దేవశర్మ అను ఒక బుద్ధిశాలియైన బ్రాహ్మణుడు ఉండేవాడు. అతడు సర్వశాస్త్ర కోవిదుడు. కాని అతని పుత్రుడు మల్లినాథుడు సోమరియై చదువుకోలేదు. తండ్రి ఎంత ప్రయత్నించినా అతడు విద్య నేర్చుకోలేదు. పెద్దయ్యాక మల్లినాథునికి వివాహం జరిగింది. ఒకనాడు మల్లినాథుని భార్య తన భర్తను అజ్ఞాని అని పరిహసించింది. అపుడు దేశాంతరం వెళ్ళి పట్టుదలతో విద్యార్జన చేసి గొప్ప పండితుడై సంస్కృతకావ్యాలకు వ్యాఖ్యానం చేసి ఘనకీర్తి సాధించాడు. ఇతడు మన తెలుగువాడు.

### ई. प्रशंसात्मकया प्रतिस्पन्दनं कुर्वन्तु।

देवालयेषु प्रतिदिनम् अन्नदानकार्यक्रमाः अयोजिताः भवन्ति । तेन कानि प्रयोजनानि भवन्तीति लिखन्तु ।

## III. भाषांशाः

### १. पदजालाभिवृद्धिः

### अ. अधः दत्तैः पदैः रिक्तस्थानानि पूरयन्तु ।

| प्रतीक्षणम् | ज्ञातपूर्वः | निर्मूलनम् | सत्वरम् |
|---|---|---|---|

१. समाजे दुराचाराणां .................... आवश्यकम् ।

२. दैवदर्शनार्थं ........................ कुर्मः ।

३. शाला .................... गन्तव्या ।

४. श्वः विराम इति .................. विषय एव ।

### आ. यथोचितं योजयन्तु ।

| | |
|---|---|
| १. अभ्यागतः | पापं ददाति |
| २. अतिथिः | पूजां करोति |
| ३. द्विजः | सखी |
| ४. भग्नाशः | अज्ञातः |
| ५. भार्या | ज्ञातपूर्वः |


SCERT TELANGANA

इ. उदाहरणानुसारम् अधः दत्तैः पदैः स्वीयवाक्यानि लिखन्तु ।

**उदा -** दाता - धाता

दाता एव निर्धनानां धात्रा सदृशः ।

१. अम्बा - धेनुः

२. विद्या - धनम्

३. वृक्षः - कालुष्यम्

ई. अधः दत्तानि वाक्यानि पठन्तु । तेषु वाक्येषु यस्य पदस्य पर्यायपदानि भवन्ति तानि क्रमशः लिखन्तु ।

१. रन्तिदेवस्य पत्नी विनयान्विता ।

२. रामस्य भार्या महासाध्वी ।

३. रन्तिदेवस्य धर्मपत्नी भर्तृवाक्यं पालयति स्म ।

४. सीता रामस्य सहधर्मचारिणी ।

५. कलत्रं मित्रमिव हितं करोति ।

६. सा पुत्रवती अतः जाया इति सार्थकनाम्नी अभवत् ।

उ. पाठे स्थितस्य 'अम्बा' इति पदस्य पर्यायपदानि लिखन्तु ।

## २. व्याकरणांशाः

अ. अधः दत्तानि वाक्यानि पठन्तु । अवगच्छन्तु ।

| प्रथमभागः | द्वितीयभागः |
|---|---|
| १. सदाशिवः उपवनम् अगच्छत् । | सदाशिवः उपवनं गतवान् । |
| २. गणेशः पाठम् अपठत् । | गणेशः पाठं पठितवान् । |
| ३. संस्कृतशिबिरम् अहम् अगच्छम् । | संस्कृतशिबिरम् अहं गतवान् । |
| ४. अध्यापिका संस्कृतेन एव अपाठयत् । | अध्यापिका संस्कृतेन एव पाठितवती । |
| ५. भीमः बहु अखादत् । | भीमः बहु खादितवान् |
| ६. भवती पुस्तकम् अनयत् । | भवती पुस्तकं नीतवती । |
| ७. विमानम् अचलत् । | विमानं चलितवत् । |
| ८. बालाः प्रश्नान् अपृच्छन् । | बालाः प्रश्नान् पृष्टवन्तः । |
| ९. नर्तक्यः नाट्यम् अकुर्वन् । | नर्तक्यः नाट्यम् कृतवत्यः । |
| १०. वृक्षात् पर्णानि अपतन् । | वृक्षात् पर्णानि पतितवन्ति । |

उपरि लिखितानि प्रथमभागस्य वाक्यानि **'लङ्'** लकारयुक्तानि वाक्यानि ।
द्वितीयभागे स्थितानि वाक्यानि **'क्तवतु'** प्रत्ययान्तानि वाक्यानि ।
उभयोः मध्ये भेदं ज्ञातवन्तः वा ! अनयोः द्वयोरपि अर्थः समानः, भूतकालार्थः एव ।



SCERT TELANGANA

**- अत्र लङ्लकारवाक्येषु लिङ्गभेदः न भवति । परन्तु पुरुषभेदः (प्रथम - मध्यम - उत्तम) भवति ।**

**'क्तवतुप्रत्ययान्तवाक्येषु लिङ्गभेदः भवति । पुरुषभेदः न भवति ।**

| | | | |
|---|---|---|---|
| यथा - | रामः | ग्रामम् | अगच्छत् । |
| | त्वं | ग्रामम् | अगच्छः । |
| | अहं | ग्रामम् | अगच्छम् । |
| | रामः | ग्रामं | गतवान् । |
| | त्वं | ग्रामं | गतवान् । |
| | अहं | ग्रामं | गतवान् । |

**क्तवतु प्रत्यये कृते लिङ्गभेदः**

| | | | |
|---|---|---|---|
| पुंलिङ्गे | **पठ्** | - | पठितवान् |
| स्त्रीलिङ्गे | | - | पठितवती |
| नपुंसकलिङ्गे | | - | पठितवत् |
| पुंलिङ्गरूपाणि | | - | गुणवत् शब्द इव |
| स्त्रीलिङ्गरूपाणि | | - | गौरीशब्द इव |
| नपुंसकलिङ्गरूपाणि- | | | जगत् शब्द इव |

1. अधः दत्तानि रिक्तस्थानानि पूरयन्तु ।

१. नारायणः साहाय्यं (कृ + क्तवतु) ...........

२. भक्ताः देवं (नम् + क्तवतु) ................

३. बालकाः कीडाङ्गणं प्रति (धाव् + क्तवतु) .........

४. जननी बालं (ताड् + क्तवतु) ...........

५. तरुण्यः देवं (पूज् + क्तवतु) ..............

६. ताः पत्रं (गृह + क्तवतु) .............

७. सा सत्यम् (वच् + क्तवतु) ...........

८. चोराः धनं (चुर् + क्तवतु) ...........

९. सर्पः बिलं (प्र.विश् + क्तवतु) ...............

१०. सः अद्य विलम्बेन (आ + गम् + क्तवतु) ..............

## परियोजनाकार्यम्

अधः लिखितानि वाक्यानि पठित्वा तादृशानि कानिचन ध्येयवाक्यानि लिखित्वा भित्तिपत्रे प्रदर्शयन्तु ।

1. अन्नदानं परं दानम् ।
2. हस्तस्य भूषणं दानम् ।
3. दानेन भूतानि वशीभवन्ति ।



SCERT TELANGANA

# ८. सङ्गच्छध्वम्

तृतीयः भागः

**पठन्तु, विचिन्त्य वदन्तु**

एकदा एकस्मिन् प्रजावासे सर्वाणि गृहाणि भस्मीभूतानि । तां दुर्घटनामधिकृत्य प्रमुखाः नेतारः दुःखं प्रकटितवन्तः। स्थानिकप्रजासमितिः एका कर्मकराणां कृते नूतनगृहनिर्माणसाहाय्यार्थं समीपवर्तिनाम् धनिकानाम् आपणिकानां च समीपं गत्वा धनयाचनं करोति । समितेः सदस्यानां दृष्टिः धनिषु एव वर्तते । तस्मिन् समये मार्गपार्श्वस्थः कश्चन कर्मकरः तान् आहूय सहस्ररूप्यकाणि दानरूपेण दत्तवान् । सदस्याः साश्चर्यं दृष्ट्वा तं प्रशंसितवन्तः। तदारभ्य दानविषये तेषां दृष्टिः परिवर्तिता।

**प्रश्नाः ?**

1. समितिः जनेभ्यः किमर्थं धनं स्वीकरोति ?
2. दानविषये सदस्यानां दृष्टिः प्रथमं कथमासीत् ?
3. अनन्तरं सा दृष्टिः कथं परिवर्तिता ?
4. कर्मकरस्य दानेन भवान् किम् अवगतवान् ?
5. भवन्तोऽपि एतादृशकार्यं कर्तुं समर्थाः भवन्ति चेत् तत् कथं कुर्वन्तीति वदन्तु ?

एवं विविधदुर्घटनासु प्राकृतिकविपदां कारणेन पीडितानां जनानां कश्चन युवकसमूहः कीदृशं साहाय्यं कृतवानिति ज्ञास्यामः।

**उद्देश्यम्**

★ सत्कार्यकरणे प्रेरणादानम् ।
★ सत्कार्यैः प्राप्तायाः अनुभूतेः अभिव्यक्तिसामर्थ्यस्य विकासः।
★ सामाजिकदुर्घटनाविषये जागरूकतायाः सम्पादनम् ।

**छात्रेभ्यः सूचनाः**

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।



2018-19
SCERT TELANGANA

सायं चतुर्वादनम् । तत् 'कृषि' नामककलाशालायाः कलाप्राङ्गणम् । सर्वैः कलाशालाच्छात्रैः आसन्दाः पूर्णा आसन् । वेदिकायां उपरि प्राचार्यः अध्यापकाश्च आसीनाः। तदा कलाशालायाः विद्यार्थिनेता मधुकरः ध्वनिग्राहकं स्वीकृत्य वाचनमारब्धवान् ।

**मधुकरः -** प्राचार्येभ्यः सर्वेभ्यः आचार्यवर्येभ्यः, मित्रेभ्यश्च नमस्काराः। दिनत्रयात्पूर्वं महती वृष्टिः आसीदिति भवन्तः जानन्ति एव तया वृष्ट्या महान् जलप्रलयः सम्भूत इति । अनेन जलप्रलयेण विविधप्रान्तेषु, पल्लीषु जनजीवनं स्थगितम् । क्षुत्पिपासाभ्यां जनाः पीडिताः आसन् ।

तस्मिन्नवसरे जलदिग्बन्धने स्थितः 'राजन्नगूडेम्' नाम ग्रामः। तद्ग्रामीणेभ्यः आहारादिकल्पनाय अस्माकं छात्राः तत्र गत्वा अद्य पुनरागताः । तेषामनुभवान् इदानीं श्रृणुमः। तस्मिन् समूहे ये ये सन्ति तेषां नामानि पठामि । अशोकः, बदरीनाथः, अर्जुनः, देवराजः, मोहनकृष्णः, चन्दना, तुलसी, नागवल्ली - एतान् अहं वेदिकां प्रति सादरम् आह्वयामि । प्रथमं मोहनकृष्णं प्रार्थये यत् स्वकीयानुभवं प्रकटयतु इति ।

**मोहनकृष्णः -** सर्वेभ्यः मित्रेभ्यः अभिनन्दनानि । भवन्तः सर्वेऽपि अस्मिन् सेवाकार्ये भागस्वामिन एव। भवद्भिः सर्वैः यद्दत्तं तद्धनम् आहत्य पञ्चाशत् सहस्ररूप्यकाणि अभवन् । तावता धनेन वयं तद्ग्रामवासिनां कृते आहारपदार्थान्, पाकपात्राणि कानिचन अन्यवस्तूनि वितीर्णवन्तः। अस्मभ्यं मार्गदर्शनाय अस्माभिस्साकम् आगतेभ्यः सामाजिकविषयाचार्येभ्यः आञ्जनेयमहोदयेभ्यः धन्यवादः।

**एकः छात्रः -** भवन्तः तावत्पर्यन्तं कथं गतवन्तः? किं कृतवन्तः? इति कृपया विशदयतु । वयं श्रोतुमिच्छामः।



**अर्जुनः -** वयमितः प्रस्थाय यथाकथञ्चित् मध्याह्ने मण्डलकेन्द्रं प्राप्तवन्तः। तत्र वणिग्जनाः धान्यानि तथा इतरपदार्थान् नित्योपयोगवस्तूनि च सर्वाणि मूल्याधिक्येन विक्रीणन्ति । तदा आचार्यः मण्डलकार्यालयं गत्वा तत्र सर्वकारसम्बन्धिनः अधिकारिणः साहय्येन न्यूनातिन्यूनमूल्येन वस्तूनि, पदार्थान् क्रीतवन्तः।

सहस्रकिलोमिततण्डुलानि (विंशतिकिलोमितपोटालिकारूपेण), तिंत्रिणी, लवणं तथा मरीचचूर्णपोटलिकाः, दशाढकद्विदलगोण्यः, अर्धकिलोमिततैलपोटलिकाः (कुटुम्बस्य) एकैक - गृहाय अपेक्षितानि पचनपात्राणि वयं क्रीतवन्तः।

एतानि वस्तूनि, पदार्थान् नेतुं भारवाहनस्यापेक्षया कृषिवाहनमुत्तममिति विचिन्त्य द्वे कृषिवाहने भाटकाय स्वीकृत्य, पदार्थान् तत्र प्रपूर्य तेषामुपरि उपविश्य वयं प्रस्थितवन्तः। ततः विंशतिकिलोमीटर् दूरे ग्रामः अस्ति । वाहने मन्दं गच्छतः।

**नागवल्ली -** समाजशास्त्राचार्यः गमनसमये प्राकृतिकविपदः कथं सम्भवन्ति ? तेषु सहजाः मानवकल्पिताः काः इति, सम्भवनात्पूर्वमेव ताः कथमूहितुं शक्येरन् ? ताभ्यः जातानां प्रभूतहानीनां निवारणप्रयत्नान् च मालाग्रथनमिव सविवरणम् अवोचन् । तान् विषयान् श्रुण्वन्तः एव अगच्छाम ।

**चन्दना -** मह्यमपि किञ्चित् कथयितुम् अवसरं ददातु । कृषियाने उपवेशनस्य अनभ्यासवशात् गर्तपूर्णमार्गेण गमनेन अस्माभिः महान् क्लेशः अनुभूतः।

**देवराजः -** तत्र ग्रामस्थाः सर्वे अस्मान् दृष्ट्वा बहुसन्तोषम् अन्वभवन् । ग्रामे सर्वत्र पङ्कः एव । कानिचन गृहाणि जलपूर्णानि । अधिकाधिकपल्लीयाः सकुटुम्बं ग्रामविद्यालये स्थितवन्तः। विद्युत् नासीत्। ग्रामीणाः तेषां शयनार्थम् आस्तरणान्यपि नासन् ।

**बदरीनाथः -** तत्र आहत्य पञ्चाशत् कुटुम्बाः आसन् । प्रत्येकं कुटुम्बस्य 20 किलोमिततण्डुलभोणी, किलोद्वयमित आढकीद्विदलानि, तत्प्रमाणानुगुणम् अन्यपदार्थान् वितीर्णवन्तः। तेषां पचनार्थं काष्ठानि सन्ति । किन्तु सार्द्रं धूमं व्यापयन्ति । अन्तिमे अतिप्रयत्नेन ते ग्रामीणाः पाकं कृत्वा भोजनमकुर्वन् ।

तदा तेषां नयनयोः महान्तं सन्तोषं वयम् अपश्याम । अस्माकं योजनाबद्धं कार्यं सफलमिति वयं भावितवन्तः। वयमपि तैस्सह तदेव भोजनम् अकरवाम । क्षुधा अधिकेतिकारणतः तदेव भोजनम् अमृतायमानम् आसीत् ।

**तुलसी -** अत्रान्तरे अन्यबृन्दः समागच्छत् । स बृन्दः आच्छादकानि, आस्तरणानि नूतनवस्त्राणि च आनयत् । तत्र केचन मण्डलतः आगतवन्तः पदविरतवैद्याः दृष्टाः। ते प्रातः एव आगत्य व्याधीनां सङ्क्रमणात्पूर्वमेव तन्निवारणकार्ये संलग्नाः अभवन् । ते आवश्यकानि औषधानि ग्रामीणेभ्यः व्यतरन् । तादृशे वयस्यपि तेषां सङ्कल्पः समाजहितकाङ्क्षा बलवती अस्तीति अहं विस्मयं प्राप्तवती । तेषां प्रयत्नस्य कार्यस्य अपेक्षया अस्माकं कार्यमल्पमिति वयं ज्ञातवन्तः। एवम् अस्माकम् अनुभूतयः सन्ति इति ।

**''सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्''**

(सर्वे छात्राः सहर्षं करतालैः तान् प्रशंसन्ति)

SCERT TELANGANA

# एतानि कुर्वन्तु

## I. भावावगमनम् - प्रतिस्पन्दनम्

### अ. अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।

१. छात्रबृन्देन कृतं कार्यमुद्दिश्य भवान् किं वदति ?

२. जलप्रलयसमयेषु प्रायः सर्वकारपक्षतः सहायता भवति परं प्रजानां पक्षतः साहाय्यम् आवश्यकं वा इति सकारणं वदन्तु ।

३. जलप्रलयानां सम्भवनात्पूर्वमेव कर्तव्याः रक्षणोपायाः के ?

४. प्रकृतिवैपरीत्यानि कथं सम्भवन्ति ? तानि वदन्तु ।

### आ. अधः दत्तानि पदानि पठन्तु । तानि पदानि पाठे अन्विष्य अनुच्छेदस्य सङ्ख्यां लिखन्तु ।

१. ध्वनिग्राहकम्

२. जलदिग्बन्धेन

३. पाकपात्राणि

४. गर्तपूर्णमार्गेण

५. अमृतायमानम्

६. क्षुत्पिपासाभ्याम्

७. भागस्वामिनः

८. कृषिवाहने

९. सकुटुम्बम्

१०. बलवती

### इ. बृन्देन ग्रामवासिनां कृते कानि वस्तूनि दत्तानीति पाठे अन्विष्य लिखन्तु ।

### ई. अधः पाठे विद्यमानानां छात्राणां नामानि सन्ति । ते स्वीयानुभवे कीदृशविषयान् उक्तवन्तः इति लिखन्तु ।

| क्र.स | छात्रस्य नाम | कम् अंशमुद्दिश्य अनुभवकथनम् |
|---|---|---|
| 1. | अर्जुनः | ग्रामं कथं गतवन्तः इति । |
| 2. | नागवल्ली | |
| 3. | चन्दना | |
| 4. | देवराजः | |
| 5. | बदरीनाथः | |



2018-19

**उ. पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. 'राजन्नगूडेम्' पर्यन्तं छात्राः कथं गतवन्तः ? विशदयन्तु ।

२. जनेभ्यः दातुं छात्रैः कानि कानि वस्तूनि स्वीकृतानि ?

३. आञ्जनेयमहोदयेन कीदृशविषयाः सूचिताः ?

४. मार्गः कथमस्ति ?

५. जलावृतः ग्रामः कथमस्ति ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

**अ. अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।**

१. महावृष्टेः पतनात् पूर्वमेव अस्माभिः ग्रामे / नगरे कीदृशविषये श्रद्धा दातव्या ? कथम् ?

२. भवतः पार्श्वस्थः ग्रामः जले निमग्नः जातः। भवान् तदा कीदृशं साहाय्यं करोति ?

३. विपदां सम्भवनानन्तरं कीदृशस्थितिः भवति ?

४. सामाजिकसेवाकार्यक्रमः इत्यस्य कः अर्थः ?

५. जलदिग्बन्धः, जलप्रलयः इत्यादिसन्दर्भेषु के के रोगाः भवन्ति ? के न सम्भवन्ति ?

६. उपद्रवसम्भवनात्पूर्वमेव जनेषु कीदृशं जागरणम् आवश्यकम् ?

**आ. अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।**

१. पाठे वर्णिता विपद् इव विपद् तव जनपदे कुत्रचित् जाता इति चिन्तयित्वा तदा भवतः साहाय्यकार्यप्रणाली कथं भवतीति लिखन्तु ।

२. जलप्रलयसन्दर्भे, उपद्रवसन्दर्भे क्रियमाणान् सामाजिककार्यक्रमान् उद्दिश्य विशदयन्तु।

**इ. सर्जनात्मकतया समाधानानि लिखन्तु ।**

१. उपद्रवपीडितेभ्यः जनेभ्यः धनधान्यादिवस्तुसामग्रीणां सङ्ग्रहणं वर्णयन्तः करपत्रमेकं रचयन्तु ।

२. अधः दत्तम् अनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

జీవనంలో ధనానికి అధిక ప్రాధాన్యం ఉంది. ధనం ద్వారా జీవనాన్ని నిర్వహించడం జరుగుతుంది. ధనం లేకుండా మనం ఆహారాన్ని కూడా పొందలేము. ఒకవేళ మనం లోభంతో అధిక ధనాన్ని పొందాలని అనుకున్నట్లైతే దుఃఖమునే పొందగలము.

### ई. प्रशंसात्मकतया प्रतिस्पन्दनं कुर्वन्तु ।

भवतां पाठशालायाम् एतादृशकर्यक्रमेषु भागं स्वीकृतवन्तः चेत् तान् अधिकृत्य वदन्तु।

## III. भाषांशाः

### १. पदजालाभिवृद्धिः

**अ. अधः दत्तं वाक्यं पठित्वा दत्तानां पदानाम् आधारेण भार्गवः तत्र किं दृष्टवान् इति स्वीयवाक्यैः लिखन्तु ।**

भार्गवः स्वमित्रैः सहायकबृन्दस्य वसतिम् उपागच्छत् ।

१. लघुनौकाः  २. आहारपोटलिकाः  ३. समाचारकेन्द्रम्  ४. हेलीपाड्

**आ. जलदिग्बन्धने तरणाय आवश्यकानि सहायकवस्तूनि लिखन्तु ।**

**उदा** - शुष्कानि काष्ठानि

**इ. अधः पदानि सन्ति । तत्सम्बद्धपदानि लिखन्तु ।**

१. ग्रामः  २. आहारवस्तूनि  ३. सेवादलम्  ४. जलम्

### २. व्याकरणांशाः

**अ. अधः दत्तानि वाक्यानि पठन्तु । रेखाङ्कितपदानि अवगच्छन्तु ।**

१. **बुद्धिमान्** एव सर्वत्र पूज्यते ।

२. **भक्तिमती** माला पूजां करोति ।

३. **श्रद्धावान्** लभते ज्ञानम् ।

४. **गुणवती** श्यामला सर्वैः आदरणीया ।

५. **गुणवत्** मित्रम् आश्रयताम् ।

१) १,२ पदयोः समानस्वरवर्णाः के ?

२) तयोः पदयोः मूलशब्दौ कौ ?

३) मूलशब्दस्य मान् / मती इति योगे कः अर्थः भवति ?

४) ३,४,५ पदानां समानस्वरवर्णाः के ?

५) तेषां पदानां मूलशब्दाः के ?

६) मूलशब्दस्य वान् / वती / वत् इति योगे कः अर्थः भवति ?



2018-19

SCERT TELANGANA

## आ. अधः लिखितानि वाक्यानि पठन्तु।

१. **नीतिमान्** जनः सुष्ठु कार्याणि आचरति ।

२. **भक्तिमान्** प्रह्लादः हिरण्यकशिपोः पुत्रः।

३. **शक्तिमान्** आञ्जनेयः वारिधिं लङ्घयामास ।

४. **धृतिमान्** कीर्तिमान् श्रीरामः पितृवाक्यपालनम् अकरोत् ।

५. **धनवान्** श्रीनरसिंहाचार्यः विदेशं गच्छति ।

६. **गुणवती** उमा मातरं नमस्करोति ।

७. **क्षमावती** धरित्री सदा वन्दनीया ।

८. **युक्तिमत्** ज्ञानं सर्वत्र उपयुक्तं भवति ।

- अत्र स्थूलाक्षराणि **मतुप् प्रत्ययान्तानि** । मतुप् प्रत्ययः सञ्ज्ञाशब्दैः सह प्रयुज्यते । मतुप् प्रत्यये मत् अवशिष्यते -

यथा - **बुद्धि + मतुप् - बुद्धिमत् - बुद्धिमान्** ।

अयं प्रत्ययः युक्तः / अस्य / अस्ति / अस्मिन् / अस्ति वा इत्यर्थे प्रथमान्तपदे प्रयुज्यते ।

मतुप् प्रत्ययेन युक्तः शब्दः विशेषणं भवति । अतः त्रिषु लिङ्गेषु भवति ।

मवर्णान्तात्, अवर्णान्तात् प्रातिपदिकात् परस्य मकारस्य उपधाभूतात् मकारात् अकारात् परस्य मकारस्य वकारः स्यात् । एषः मकारः यवादिभिः (यवादिपदैः) वर्जितः स्यात् ।

सूत्रम् - मादुपधायाश्च मतोर्वोऽयवादिभ्यः

## इ. मतुप् प्रत्ययान्तरूपाणि उपयुज्य रिक्तस्थानानि पूरयन्तु ।

१. .................... हि आशा । (बल+मतुप्)

२. .................... मनुष्यः किं कर्तुं न समर्थः ? (शक्ति+मतुप्)

३. सर्वथा ................ सुखी भवति । (त्याग+मतुप्)

४. यूथपः .................... आसीत् । (ज्ञान+मतुप्)

५. तस्य कलत्रम् .................... अस्ति । (विद्या+मतुप्)

## परियोजनाकार्यम्

1. "उपद्रवाणां निवारणोपायाः" इत्यंशम् अधिकृत्य पत्रिकासु, अन्तर्जाले, अन्विष्य स्फोरकपत्रमेकं रचयन्तु ।

(अथवा)

2. सेवासमितिभिः उपद्रवपीडितजनेभ्यः क्रियमाणानां विविधसेवाकार्याणां चित्राणि सङ्गृह्य कक्ष्यायां प्रदर्शयन्तु ।



SCERT TELANGANA

# ९. सोमनाथो विजयते

तृतीयः भागः

## पठन्तु, विचिन्त्य वदन्तु

केचन विद्यालयच्छात्राः पुरातनवस्तुप्रदर्शनशालां द्रष्टुम् अगच्छन् ।

वेङ्कटेशः - अच्युत ! श्रीरामपट्टाभिषेकपटचित्रम् पश्यतु । बहुसुन्दरं दृश्यते ?

अच्युतः - आम्, अत्र विग्रहं पश्यन्तु । अयं ध्वस्तः दृश्यते ।

नवीनः - केचन वैदेशिकाः न केवलं विग्रहाणां किन्तु अस्माकं सांस्कृतिकचिह्नानां, देवालयानां ध्वंसमपि अकुर्वन् ।

अच्युतः - एवं वा ?

उपाध्यायः - किं किं दृष्टम् प्रदर्शनशालायाम् ?

रामनाथः - तत्र अस्माभिः पुरातनवस्तूनि, शिथिलध्वस्ताः विग्रहाः च दृष्टाः।

**प्रश्नाः ?**

1. पुरावस्तुशालायां कीदृशानि वस्तूनि स्थापयन्ति ?
2. तत्रस्थविग्रहादीनि कीदृशानि ?
3. वैदेशिकैः पालकैः किमर्थं देवालयानां विग्रहादीनां ध्वंसः कृतः ?

## उद्देश्यम्

★ भारतदेशे विद्यमानानां पुरातनदेवालयानां विशेषतानां ज्ञापनम् ।
तेषां दैन्यत्वविवरणेन अद्यतनदेवालयानां परिरक्षणे जागरूकतायाः अभिवर्धनम् ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

विजयवाडा,
दिनाङ्कः २७.८.२०१२.

प्रेषकस्य सङ्केतः
पि. सोमनाथः,
11 प्रमोदगृहसमुदायः,
बृन्दावनकालनी,
विजयवाडा.

सविधे,
प्रियसखे अशुतोष !

नमस्कारः । अहमत्र कुशली । सपरिवारस्य भवतः कुशलमिति भावयामि । सोमनाथे भक्तिमान् मम पिता मम नाम सोमनाथ इति स्थापितवान् इति पूर्वम् आवयोः मेलनावसरे उक्तवान् खलु ! चिरात् दर्शनकाङ्क्षया मम पिता, माता अहं च गतश्रावणशुद्धद्वितीयायां सोमवासरे सौराष्ट्रं गतवन्तः।

**सौराष्ट्रदेशे वसुधावकाशे**
**ज्योतिर्मयं चन्द्रकलावतंसम् ।**
**भक्तिप्रदानाय कृतावतारं**
**तं सोमनाथं शरणं प्रपद्ये ।।**

इत्यादिस्तोत्रपाठैः जय सोमनाथेति जयघोषैश्च नगरं सर्वतः सोमनाथनामसंकीर्तनेन आपूरितमिवासीत्। सोमनाथक्षेत्रं पुराणेतिहासेषु प्रभासतीर्थनाम्ना प्रसिद्धमस्ति । दक्षशापात् क्षयरोगग्रस्तः सोमः नाम चन्द्रः प्रभासतीर्थे स्नानमात्रेण क्षयरोगाद्विमुक्तः। पुनः सः कलावृद्धिं प्राप्तवान् इति भागवती कथा श्रूयते । प्रभासे एव भगवान् श्रीकृष्णः स्वदेहोत्सर्गमकरोत् ।

प्रातरेव तत्र प्राप्ता वयं प्रथमतः कपिला - हिरणा - सरस्वतीनदीत्रयसङ्गमे 'त्रिवेणीघाट्' इत्यत्र पुण्यस्नानमाचरितवन्तः। बलूखातीर्थे श्रीकृष्णदेहोत्सर्गस्थलं च सेवितवन्तः। ततः पुरातनसोमनाथमन्दिरं सूर्यमन्दिरं च संसेव्य सोमनाथज्योतिर्लिङ्गसन्दर्शनार्थं गताः। सखे ! तन्मन्दिरस्य विषये किं वा लेखितुं शक्नोमि ? केवलं चक्षुष्मतां फलमिदम् इत्येव कथयितुमुचितं भावयामि ।

क्री.श. 1947 तमवर्षे नवम्बर्मासस्य 9 दिनाङ्के जुनागढ् संस्थानं स्वतन्त्रभारते अन्तर्भूतं यत्र प्रभासमन्तर्गतं वर्तते । ततः दिनचतुष्टयानन्तरं तत्रागतः स्वतन्त्रभारतदेशस्य उपप्रधानमन्त्री, देशस्य अखण्डतायै समर्पितसर्वस्वः, स्वकर्मणा लोहपुरुष इति विख्यातः श्री सर्दार् वल्लभभाई पटेल् महाभागः अहल्याबाई मन्दिरे आयोजितायां महासभायां भाषमाणः सौराष्ट्रप्रजाः उद्दिश्य सोमनाथमन्दिरपुनर्निर्माणे दृढनिश्चया वयम्, पवित्रेऽस्मिन् कार्ये सर्वैर्भागो ग्राह्यः इत्यभ्यर्थयत् । प्रजाबाहुल्यस्य पवित्रं स्थानं, देशस्यास्य सौभाग्यचिह्नं च यद् अस्ति तस्य ध्वंस एव स्वस्य विजयमिति भावयता मोहम्मद् घजनिना ध्वस्तस्य सोमनाथमन्दिरस्य पुनर्निर्माणमेव देशस्वातंत्र्यफलं भावयद्भिः सर्वमान्यैः तदानीन्तनमहद्भिः के.एम्.मुन्शी


पुरातनसोमनाथमन्दिरम्

इत्यादिभिः विज्ञापितः पटेल्महाभागः तथा घोषितवान् । गान्धीमहात्मनः आशयं विदित्वा, तदनुसारं पटेल्महाभागेन सोमनाथमन्दिरस्य पुनर्निमाणन्यासः प्रकल्पितः अभवत् । तत्र नवनगरीयः जाम् साहेब्, शामल् दास् गान्धी च सौराष्ट्रराज्यसर्वकारपक्षतः, गाड्गीलः डि.वि.रेगे च भारतसर्वकारपक्षतः ब्रिज्मोहन् बिड्ला एवं के.एम्. मुन्शी च पौरसमाजपक्षतः सदस्यरूपेण नियुक्ताः। मुन्शीमहाशयस्य नेतृत्वे मन्दिरनिर्माणमारब्धम् । भूमिपूजायां सर्दार्महाशयः भागं गृहीतवान् । दुर्दैवात् मन्दिरोद्घाटनात्पूर्वमेव सः मृत्युं प्राप्तवान् । 1951 तमे वर्षे मे मासस्य 11 दिनाङ्के भारतराष्ट्रपतेः डा. राजेन्द्रप्रसाद् महाभागस्य करकमलाभ्याम् यावद् भारतव्यापि द्वादशज्योतिर्लिङ्गानां प्रथमस्य सोमनाथज्योतिर्लिङ्गस्य पुनः प्रतिष्ठापनं विहितम् । मन्दिरे सोमनाथस्य भगवतः दर्शनवेलायां स्मृतिपथमागतोऽयं वृत्तान्तः कीदृशं स्वातन्त्र्यं देशभक्तैरपेक्षितमिति ज्ञातुं सहायकः अभवत् ।


नवीनसोमनाथमन्दिरम्

सोमनाथसन्दर्शनानन्तरं कामनाथमहादेवमन्दिरं, लक्ष्मीनारायणमन्दिरं, परशुराममन्दिरम् अखिलाबाई मन्दिरं च दृष्ट्वा भोजनादिकं कृतम् । पश्चात् पञ्चपाण्डवगुहां, सोमनाथपुरावस्तुशालां जुनागढ्द्वारञ्च संवीक्ष्य सोमनाथसमुद्रतटं प्राप्ताः। तत्र चिरं विश्रम्य ततः रात्रिभोजनादिकं परिसमाप्य धूमयाने स्वस्थानं प्रतिनिवृत्ताः। सर्वं च ते रोचते इति मन्ये । भवतः प्रत्युत्तरमभिलषन् -

प्रेमास्पदमित्रम्,
सोमनाथः।

ग्रहीतुः सङ्केतः,
श्री. अशुतोषः,
401. वेङ्कटरमणगृहसमुदायः,
बन्जारा एवेन्यु,
खैरताबाद ।


SCERT TELANGANA

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ. अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. सखे ! तन्मन्दिरस्य विषये किं वा लेखितुं शक्नोमि इति उक्तवतः सोमनाथस्य अभिप्रायः कः? वदन्तु ।

२. ''चारित्रकप्रदेशानां रक्षणं करणीयम्'' इत्यंशम् उद्दिश्य चर्चां कुर्वन्तु ।

३. अद्यतनकाले लेखाः कथं प्रेष्यन्ते ? तेषां परिवर्तनम् कथम् अभवत् ?

४. देशस्वातन्त्र्यात् पूर्वं देवालयानां स्थितिः लेखे वर्णिता । इदानीन्तनदेवालयानां परिस्थितिः कथम् वर्तते ?

**आ. अधः दत्तानि पदानि पाठे अन्विष्य रेखाङ्कितानि कुर्वन्तु ।**

| | | |
|---|---|---|
| मेलनावसरे | ज्योतिर्मयं | स्वदेहोत्सर्गम् |
| चक्षुष्मताम् | अन्तर्भूतं | अखण्डतायै |
| सौभाग्यचिह्नं | दुर्दैवात् | वसुधावकाशे |
| प्रपद्ये | स्वकर्मणा | |

**इ. सपरिवारेण सोमनाथः प्रथमतः, कपिलहिरणासरस्वतीत्रिवेणीरारभ्य सोमनाथज्योतिर्लिङ्ग-दर्शनार्थं यावत् कुत्र कुत्र गतवान् ? तेषां प्रदेशानां नामानि लिखन्तु ।**

**ई. अधः दत्तानि वाक्यानि पठन्तु । तत्सम्बद्धवाक्यानि पाठे अन्विष्य लिखन्तु ।**

१. सोमनाथक्षेत्रं पुराणेतिहासेषु '' प्रभासा'' इति नाम्ना प्रसिद्धम् अभवत् ।

२. तं सोमनाथम् अहं शरणं प्रपद्ये ।

३. दुर्दैवात् मन्दिरस्य प्रारम्भात् पूर्वमेव पटेल् महाभागः दिवङ्गतः ।

४. पवित्रेऽस्मिन् मन्दिरनिर्माणकार्ये सर्वैः भागः स्वीकर्तव्यः इति प्रार्थितवन्तः ।

**उ. अधः दत्तम् अनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।**

अहं खलु कालः! विश्वस्य आत्माऽहम् । कलयामि गणयामि जगतः आयुः प्रमाणम् । सततं चक्रवत् परिवर्तमानः भूतं, वर्तमानं भविष्यदपि च वीक्ष्यमाणः अहमेव साक्षी जगतः उत्पत्तेः विकासस्य प्रलयस्य च । इदम् जगत् तु पुनः पुनः

जायते विलीयते च । परमहं सर्वदा विद्यमानोऽस्य सर्वं क्रियाकलापं पश्यामि । अहो ! किं जानीथ यूयम् 'कियन्ती प्राचीना इयम् सृष्टिः ! नैव । तर्हि श्रृणुत ध्यानेन । कृतयुगं, त्रेतायुगं, द्वापरयुगं कलियुगञ्चेति चत्वारि युगानि । चतुर्णां युगानां समूहः एव महायुगम् । एकसप्ततिमहायुगानाम् समूहः एकम् मन्वन्तरम् । चतुर्दशमन्वन्तराणां समूहः कल्पः । एकः कल्प एव ब्रह्मणः एकं दिनं मन्यते । ब्रह्मणः आयुः शतं वर्षाणि ।

१. चक्रवत् कः परिवर्तते ?

२. ब्रह्मणः आयुः कानि वर्षाणि ?

३. मन्वन्तरं नाम कति महायुगानां समूहः ?

४. कालः जनान् कं प्रश्नं पृच्छति ?

५. अनुच्छेदस्य शीर्षिकां सूचयन्तु ।

### ऊ. पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. सपरिवारः सोमनाथः कदा सौराष्ट्रं गतवान् ?

२. सोमनाथमन्दिरस्य पुनर्निर्माणाय न्यासः केन प्रकल्पितः ? न्यासे के के आसन् ?

३. सरदार्पटेल्महाभागः अहल्याभाई मन्दिरे किं समभ्यर्थयत् ?

४. पुराणेतिहासेषु प्रभासक्षेत्रस्य कीदृशी विशेषता अस्ति ?

५. सोमनाथस्य पिता तस्य किमर्थं "सोमनाथ" इति नाम स्थापितवान् ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ. अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. "लोहपुरुषः" इति सरदार्वल्लभभाई महाभागः किमर्थं विख्यातः ?

२. कैश्चित् दुष्टपालकैः देवालयाः विध्वस्ताः इति भवान् ज्ञातवान् । तैः तथा किमर्थं कृतम् ?

३. सोमनाथक्षेत्रस्य पुराणेतिहासेषु प्रभासक्षेत्रम् इति नाम प्रसिद्धम् । एवमेव केषाञ्चन प्रसिद्धक्षेत्राणां नामानि लिखन्तु ।

४. चारित्रकप्रदेशानां रक्षणं कथं भवति ?



SCERT TELANGANA

## आ. अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. ''सोमनाथक्षेत्रयात्रां'' स्वीयवाक्यैः निबन्धरूपेण लिखन्तु ।

२. सोमनाथः भवतः मित्रम् इति भावयन् तस्य लेखस्य प्रत्युत्तरं लिखन्तु ।

## इ. सर्जनात्मकतया समाधानानि लिखन्तु ।

१. चारित्रकप्रदेशानां रक्षणं-देशसौभाग्यरक्षणम् इत्यंशमाधारीकृत्य एकं करपत्रं रचयन्तु ।

२. अधः दत्तम् अनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

కేరళ ప్రదేశం ప్రాచీనకాలం నుండీ సంస్కృతీసంప్రదాయాలకు నెలవు. విశ్వప్రసిద్ధమైన తిరువనంతపురమందిరము ఈ రాష్ట్రంలోనే ఉన్నది. అద్వైతమతస్థాపకులైన పరమ పూజ్యశంకరులు కూడా ఈ ప్రాంతముననే జన్మించారు. కేరళ రాష్ట్రమంతటా నారికేళవృక్షములతో నిండి ఉంది. వీరి యొక్క ముఖ్య ఆదాయవనరు కూడా ఇదే. అక్షరాస్యతలో ఈ రాష్ట్రం దేశంలోనే ప్రథమస్థానంలో ఉంది.

## ई. प्रशंसात्मकतया प्रतिस्पन्दनं कुर्वन्तु ।

चारित्रकनिर्माणानि रक्षणीयानि किमर्थमिति वदन्तु ।

# III. भाषांशाः

## 1. पदजालाभिवृद्धिः

### अ. अधः दत्तानि वाक्यानि पठन्तु । रेखाङ्कितपदानि उपयुज्य पुनः नूतनवाक्यानि लिखन्तु ।

१. सोमनाथमन्दिरम् पुरातनम् अस्ति ।

२. पवित्रा गङ्गानदी हिमालयात् प्रवहति ।

३. द्वादशज्योतिर्लिङ्गानां प्रथमस्य सोमनाथमन्दिरस्य पुनः प्रतिष्ठापनं विहितम् ।

४. राजनीतिज्ञः दृढसंकल्पः सरदार्वल्लभभाई पटेल् भारतस्य उपप्रधानमन्त्री अभवत् ।

५. सोमनाथे भक्तिमान् मम पिता सोमनाथः इति मम नाम कृतवान् ।



SCERT TELANGANA

आ. अधः दत्तायां पट्टिकायां पत्रम् कः कस्मै लिखति, तत्र सम्बोधनं समाप्तिश्च कथमभवदिति उदाहरणानुसारं पूरयन्तु ।

| कः कस्मै | सम्बोधनम् | समाप्तिः |
|---|---|---|
| 1. पिता पुत्राय | प्रियपुत्र राजेश ! चिरञ्जीव ! | त्वदीयः शुभचिन्तकः |
| 2. पुत्रः पित्रे | | |
| 3. मित्राय | | |
| 4. अग्रजाय / अग्रजायै | | |
| 5. अनुजाय / अनुजायै | | |
| 6. प्रधानाचार्याय | | |
| 7. पत्रिकाकाराय | | |

## 2. व्याकरणांशाः

अ. अधः दत्तानां समस्तपदानां विग्रहवाक्यानि समासनामानि च लिखन्तु ।

१. ज्योतिर्मयम्
२. वसुधावकाशे
३. दक्षशापात्
४. बलूखातीर्थे
५. प्रभासतीर्थे
६. सूर्यमन्दिरम्
७. स्वतन्त्रभारते
८. स्वकर्मणा
९. महासभा
१०. दृढनिश्चयाः
११. सौभाग्यचिह्नम्
१२. भूमिपूजायाम्
१३. दर्शनवेलायाम्
१४. देशभक्तैः

आ. अधः दत्तानां पदानां विसन्धिं कुर्वन्तु ।

१. भोजनादिकम्
२. आगतोऽयम्
३. दृढनिश्चया वयम्
४. इत्यादिभिः
५. तदनुसारम्
६. सोमनाथेति
७. पुराणेतिहासेषु
८. क्षयरोगाद्विमुक्तः
९. तत्रागतः

SCERT TELANGANA

## इ. एतत् गीतम् गायन्तु, विवरणम् अवगच्छन्तु ।

मनसा सततं **स्मरणीयम्**

वचसा सततं **वदनीयम्**

लोकहितं मम **करणीयम्** ॥ लोकहितम् ॥

न भोगभवने **रमणीयम्**

न च सुखशयने **शयनीयम्**

अहर्निशं **जागरणीयम्**

लोकहितं मम **करणीयम्** ॥ लोकहितम् ॥

- स्थूलाक्षरायुतानि पदानि **अनीयर्प्रत्ययान्तपदानि**
- अनीयर् प्रत्ययः कर्मवाच्ये / भाववाच्ये वा भवति ।
- अनीयर्प्रत्ययेन युक्तं पदं विध्यर्थकं बोधयति ।

## ई. अधः दत्तानि वाक्यानि पठन्तु ।

१. अस्माभिः महात्मा गान्धीमहोदयः **स्मर्तव्यः**।

२. त्वया सततं सत्यं **वक्तव्यम्** ।

३. वृक्षाः सदा **रक्षितव्याः**।

४. पुत्रेण परीक्षा **लेखितव्या** ।

५. राधिकया देवी पूजा **कर्तव्या** ।

६. शारदया भोजनं **कर्तव्यम्** ।

७. अस्माभिः पुराणानि **पठितव्यानि** ।

- उपरि स्थूलाक्षराणि पदानि **तव्यत् प्रत्ययान्तानि**
- तव्यत् प्रत्ययः अपि कर्मवाच्ये भाववाच्ये वा प्रयोक्तव्यः।
- अनीयर् प्रत्ययवत् विध्यर्थके एव तव्यत् प्रत्ययः क्रियते ।



SCERT TELANGANA

## उ. अधः दत्तस्य उदाहरणानुसारं तव्यत् / अनीयर् प्रत्ययान्ताभ्यां वाक्यानि रचयन्तु ।

उदा - श्रीनाथेन पाकः (पच् - (तव्यत् / अनीयर्)

- श्रीनाथेन पाकः पचितव्यः । ( तव्यत् )

- श्रीनाथेन पाकः पचनीयः । ( अनीयर् )

१. माधुर्या औषधं (स्वी.कृ.+तव्यत्/अनीयर्)

२. मात्रा माला (रच्+तव्यत्/अनीयर्)

३. कर्षकेण क्षेत्रं (कर्ष् + तव्यत्/अनीयर्)

४. सदा सुवचनानि (श्रु+तव्यत्/अनीयर्)

५. सर्वैः ज्ञानं (प्र+आप्+तव्यत्/अनीयर्)

६. आपणे पुस्तकं (क्री + तव्यत्/अनीयर्)

७. विनोदात्मकचित्राणि (दृश+तव्यत्/अनीयर्)

८. मया शाटिका (धृ+तव्यत्/अनीयर्)

९. मात्रा शिशुः (पाल्+तव्यत्/अनीयर्)

### परियोजनाकार्यम्

भवता दृष्टस्य चारित्रकक्षेत्रस्य वैशिष्ट्यम् सङ्गृह्य भित्तिपत्रे लिखतु ।

**अन्नदानं परं दानं विद्यादानमतः परम्**

SCERT TELANGANA

# १०. मातङ्गकथा

तृतीयः भागः

**चित्रं पश्यन्तु, विचिन्त्य वदन्तु**



**प्रश्नाः ?**

1. श्रीरामः कस्य देशस्य राजा ?
2. रामस्य शिरसि किमस्ति ?
3. चित्रे के के सन्ति ? ते के ?
4. रामस्य पार्श्वे का अस्ति ?

श्री राम इव पूर्वकाले अनेके राजानः पालयन्ति स्म ।
तेषु कस्यचन राज्ञः चरितम् अद्य ज्ञास्यामः ।

**उद्देश्यम्**

★ प्राचीनकवीनां रचनाशैल्याः तात्कालिकदेशभौगोलिकस्थितेः मानवव्यवहारशैल्याः च ज्ञापनम् ।

**छात्रेभ्यः सूचनाः**

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।



2018-19

SCERT TELANGANA

राजवाहनो मङ्गलसूचकं शुभशकुनं विलोकयन् देशं कञ्चिदतिक्रम्य विन्ध्याटवी - मध्यमविशत् । तत्र हेतिहतिकिणाङ्कं कालायसकर्कशकायं यज्ञोपवीतेनानुमेयविप्रभावं व्यक्तकिरातप्रभावं लोचनपरुषं कमपि पुरुषं ददर्श । तेन विहितपूजनो राजवाहनोऽभ्यभाषत। ''ननु मानवजनसङ्गरहिते मृगहिते घोरप्रचारे कान्तारे विन्ध्याटवीमध्ये भवानेकाकी किमिति निवसति ? भवदंसोपनीतं यज्ञोपवीतं भूसुरभावं द्योतयति, हेतिहतिभिः किरातरीतिरनुमीयते, कथय ! किमेतदिति''। तेजोमयोऽयं न मानुषमात्रपौरुषो नूनं भवतीति मत्वा स पुरुषस्तद्वयस्य मुखान्नामजनने विज्ञाय तस्मै निजवृत्तान्तमकथयत् -

राजनन्दन ! केचिदस्यामटव्यां वेदादिविद्याभ्यासमपहाय निजकुलाचारं दूरीकृत्य सत्यशौचादिधर्मव्रतं परित्यज्य किल्बिषमन्विष्यन्तः पुलिन्दपुरोगमास्तदन्नमुपभुञ्जानाः बहवो ब्राह्मणब्रुवाः निवसन्ति । तेषु कस्यचित्पुत्रो निन्दापात्रचारित्रो मातङ्गनामाऽहम् । स च अहं किरातजालेन जनपदं प्रविश्य ग्रामेषु धनिनः स्त्रीबालसहितानानीय बन्धने निधाय तेषां



सकलधनमपहरन्नुद्धृत्य वीतदयो व्यचरम् । कदाचिदेकस्मिन्कान्तारे मदीयसहचरगणेन जिघांस्यमानं भूसुरमेकमवलोक्य दयायत्तचित्तोऽवोचम् । 'ननु पापाः, न हन्तव्यो ब्राह्मण' इति । ते रोषारुणनयनाः मां बहुधा निरभर्त्सयन् । तेषां भाषणपारुष्यमसहिष्णुरहमवनीसुररक्षणाय चिरं प्रयुध्य तैरभिहतो गतजीवितोऽभवम् ।

ततः प्रेतपुरीमुपेत्य तत्र देहधारिभिः पुरुषैः परिवेष्टितं सभामध्ये रत्नखचितसिंहासनासीनं शमनं विलोक्य तस्मै दण्डप्रणाममकरवम् । सोऽपि मामवेक्ष्य चित्रगुप्तं नाम निजामात्यमाहूय तमवोचत् "सचिव ! नैषोऽमुष्य मृत्युसमयो, निन्दितचरितोऽप्ययं महीसुरनिमित्तं गतजीवितोऽभूत्। इतःप्रभृति विगलितकल्मषस्याऽस्य पुण्यकर्मकरणे रुचिरुदेष्यति । पापिष्ठैरनुभूयमानमत्र यातनाविशेषं विलोक्य पुनरपि पूर्वशरीरमनेन गम्यताम्" इति, चित्रगुप्तोऽपि तत्र तत्र संतप्तेष्वयस्स्तम्भेषु बध्यमानानत्युष्णीकृते विततशरावतैले क्षिप्यमानान्, लगुडैः जर्जरीकृतावयवान्, निशितटङ्कैः परितक्ष्यमाणानपि दर्शयित्वा पुण्यबुद्धिमुपदिश्य माममुञ्चत् ।

तदैव पूर्वशरीरमहं प्राप्तो महाटवीमध्ये शीतलोपचारं रचयित्वा महीसुरेण परीक्ष्यमाणशिलायां शयितः क्षणमतिष्ठम् । तदनुविदितोदन्तो मदीयबन्धुगणस्सहसा समागत्य, मन्दिरमानीय, मामपक्रान्तव्रणमकरोत्, द्विजन्मा कृतज्ञो मह्यमक्षरशिक्षां विधाय, विविधागमतन्त्रमाख्याय, कल्मषक्षयकारणं सदाचारमुपदिश्य, ज्ञानेक्षणगम्यमानस्य शशिखण्डशेखरस्य पूजाविधानमभिधाय, पूजां मत्कृतामङ्गीकृत्य निरगात् । तदारभ्याहं किरातकृतसंसर्गं बन्धुकुलमुत्सृज्य सकललोकैकगुरुमिन्दुकलावतंसं चेतसि स्मरन्नस्मिन्कानने दूरीकृतकलङ्को वसामि इत्यवदत् ।

## कविपरिचयः

संस्कृतसाहित्ये गद्यकाव्यप्रणेतृषु दण्डी अन्यतमः । अयञ्च सप्तमशताब्दीयः, भारविमहाकवेः पौत्रः, दाक्षिणात्यः इति साहित्यकाराणाम् अभिप्रायः । दण्डी ग्रन्थत्रयं व्यरचयत् । १. काव्यादर्शः (अलङ्कारशास्त्रम्) २. दशकुमारचरितम् (गद्यकाव्यम्) ३. अवन्तिसुन्दरीकथा (अलभ्यम्) । सुप्रसिद्धालङ्कारिकेण राजशेखरेण **"त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः"** इति दण्डिनः ग्रन्थत्रयं प्रस्तुतम् । प्रस्तुते दशकुमारचरिते दशराजकुमाराणां साहसचरितं राजनीति - व्यवहारज्ञानञ्च स्पष्टतया वर्णितम् । **"दण्डिनः पदलालित्यमिति"** आभाणकानुसारेण स्निग्धसुन्दरपदानां सम्मेलनं माधुर्यञ्च दण्डिनः कवितायाः वैशिष्ट्यम् ।



SCERT TELANGANA

# एतानि कुर्वन्तु

## I. भावावगमनम् - प्रतिस्पन्दनम्

### अ. अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।

१. निजकुलाचारः परित्यज्यते चेत् किं भविष्यति ?

२. मातङ्गः ''न हन्तव्यो ब्राह्मणः'' इति वदन् ब्राह्मणं रक्षितुं प्राणमर्पितवान् । तादृशप्रदेशे यदि भवन्तः सन्ति चेत् किं कुर्वन्ति ?

३. प्रेतपुरीदर्शनेन मातङ्गः किम् अनुभूतवान् स्यात् इति विचिन्त्य वदन्तु ।

### आ. पाठ्यांशे स्थितानां सन्धिसमासपदानाम् अधः रेखाङ्कनं कुर्वन्तु ।

### इ. अधः दत्तानि वाक्यानि पठन्तु । कः कं प्रति वदति इति ससन्दर्भं लिखन्तु ।

१. ''भवदंशोपनीतं यज्ञोपवीतं भूसुरभावं द्योतयति । हेतिहतिभिः किरातरीतिरनुमीयते'' ।

२. ''न हन्तव्यो ब्राह्मणः'' ।

३. ''पुनरपि पूर्वशरीरम् अनेन गम्यताम्'' ।

४. ''अस्मिन् कानने दूरीकृतकलङ्कोऽहं वसामि'' ।

### ई. पाठे स्थितैः पदैः रिक्तस्थानानि पूरयन्तु ।

१. तदेव .................... अहं प्राप्तम् ।

२. मातङ्गः तस्मै .............. अकथयत् ।

३. ................ मातङ्गनामाहम् ।

४. तैः अभिहतः ...................... अभवम् ।

### उ. अधः दत्तं परिच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

कस्मिंश्चित् राज्ये कश्चन राजा आसीत् । सः परमधार्मिकः। सः ज्ञानिनः मन्त्रिणः उपदेशम् अनुसृत्य राज्यं पालयति स्म । एकस्मिन् पर्वदिनसमये शत्रुः ससैन्यम् आगतवान् । अकस्मात् प्रवृत्ते युद्धे राजा पराजितः अभवत् । ते सर्वे रहस्यमार्गेण पलायनं कृतवन्तः। दुःखितं राजानं दृष्ट्वा मन्त्री एवम् उक्तवान् ''ते अधर्मयुद्धं कृतवन्तः। वयमपि शत्रोः शतृणां सहकारं स्वीकुर्मः'' । मन्त्रिणः चातुर्येण शत्रोः शतृणां मैत्रीं प्राप्य राजा पुनः युद्धं कृत्वा स्वीयं राज्यं प्राप्तवान् ।



SCERT TELANGANA

१. राजा कीदृशः ?

२. राजा कथं राज्यं पालयति स्म ?

३. राजा किमर्थं पराजितः ?

४. राज्ञः विजये कारणम् किम् ?

५. अनया कथया भवन्तः किं जानन्ति ?

**उ. पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. राजवाहनः वने कं ददर्श ?

२. राजा वनेचरं किमिति अभ्यभाषत ?

३. 'यमलोकं दर्शय' इति कः कम् उक्तवान् ?

४. अटव्यां ब्राह्मणाः कथं निवसन्ति स्म ?

५. वनेचरस्य नाम किम् ?

६. मातङ्गः केन कारणेन यमेन भूलोकं प्रेषितः ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

**अ. अधः दत्तानां प्रश्नानां लघुसमाधानानि लिखन्तु ।**

१. के यमलोकं गच्छन्ति ?

२. पापफलं किमिति जानाति वा ?

३. भवान् किमपि सुकार्यं कृतवान् चेत् वदतु ।

**आ. अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।**

१. पाठं पठित्वा लघुवाक्यैः कथां लिखन्तु ।

२. यदि भवतः पुरतः कमपि पुरुषं चत्वारः पुरुषाः मिलित्वा ताडयन्ति तर्हि भवान् किं करोति ?

**इ. सर्जनात्मकतया समाधानानि लिखन्तु ।**

१. एनं पाठं सम्भाषणरूपेण लिखन्तु ।

२. अधः दत्तं परिच्छेदं संस्कृतभाषया अनुवदन्तु ।

ఎవరైతే స్థిరములైన వాటిని వదిలిపెట్టి, స్థిరాలు కానివాటిని పొందటం కోసం ప్రయత్నం చేస్తారో, వారికి తమ దగ్గర ఉన్న స్థిరములైనవి నశించిపోతాయి. స్థిరాలు కానివి ఎలాగూ లభించవు. కావున రెండూ దక్కకుండా పోతాయి. మనిషి ఎప్పుడూ అత్యాశకు పోగూడదు.



SCERT TELANGANA

### ई. प्रशंसात्मकतया प्रतिस्पन्दनं कुर्वन्तु ।

अस्मिन् पाठे तव किं इष्टम् ? राजवाहनो मातङ्गः यमपुरीवर्णनं वा ?

## III. भाषांशाः

### 1. पदजालाभिवृद्धिः

#### अ. उचितैः पदैः रिक्तस्थानानि पूरयन्तु ।

| | | | |
|---|---|---|---|
| विना | अतिक्रम्य | किल्बिषहरणम् | वीतदयः |

१. गोसेवया .................. भवति ।

२. मातरं ............. शिशुः कुत्रापि न चलति ।

३. .............. पुलिन्दः मृगं मारितवान् ।

४. रमा रेखां ............... धावितवती ।

#### आ. उदाहरणानुसारम् अधः दत्तानि पदानि उपयुज्य स्वीयवाक्यानि रचयन्तु ।

**उदा** - अरण्यम् - प्रेतपुरी

अरण्ये गमनं प्रेतपुरीगमनमिव भयं जनयति ।

भूसुरः - महीधरः

सदाचारः - अपचारः

राजा - अटवी

### 2. व्याकरणांशाः

#### अ. अधः दत्तानि सन्धिकार्याणि कुर्वन्तु ।

| 1. सन्धिं कुर्वन्तु - सन्धिनाम निर्दिशन्तु । | 2. विसन्धिं कुर्वन्तु - सन्धिनाम निर्दिशन्तु । |
|---|---|
| १. महा + अटवी | 1. नानुमोदम् |
| २. सः + अपि | 2. निजामात्यम् |
| ३. पुनः + अपि | 3. पुनरेव |
| ४. न + एषः | 4. विन्ध्याटवी |
| ५. तैः + उक्तः | 5. ज्ञानेक्षणम् |

#### आ. अधः दत्तनां पदानां विग्रहवाक्यानि लिखन्तु । समासस्य नाम सूचयन्तु ।

१) कालायसकर्कशकायः  २) भूसुरः  ३) महीधरः



SCERT TELANGANA

## इ. अधः दत्तानि वाक्यानि पठन्तु । विवरणम् अवगच्छन्तु ।

१. वागीशः ब्रह्मा ।

वाक् + ईशः = वागीशः (क् + ई = ग्)

- ककारस्य ईकारे परे ककारस्य स्थाने गकारः आगतः।

२. अजन्तः शब्दः रामशब्दः।

अच् + अन्तः = अजन्तः (च् + अ = ज्)

- चकारस्य अकारे परे चकारस्य स्थाने जकारः आगतः।

३. जगदीशः शङ्करः।

जगत् + ईशः = जगदीशः (त् + ई = द्)

- तकारस्य ईकारे परे तकारस्य स्थाने दकारः आगतः।

अनेन ज्ञायते -

पदान्ते झलां जशः भवन्ति ।

**अयं जश्त्वसन्धिः इत्युच्यते ।**

जश् - ज्, ब्, ग्, ड्, द्

सूत्रम् - **"झलां जशोऽन्ते"** पदान्ते झलां जशः स्युः ।

अर्थात् ञ-म-ङ-ण-न वर्णान् वर्जयित्वा पदान्ते स्थितानां वर्गीयव्यञ्जनानां स्वरे मृदुव्यञ्जने च परे तत्तद्वर्गीयतृतीयव्यञ्जनम् आदेशो भवति ।

1. वर्गीयव्यञ्जनानि + स्वरः = जश्

| | | | | |
|---|---|---|---|---|
| १. वाक् | + | ईशः | = | वागीशः |
| २. अच् | + | अन्तः | = | अजन्तः |
| ३. मधुलिट् | + | अस्ति | = | मधुलिडस्ति |
| ४. जगत् | + | ईशः | = | जगदीशः |
| ५. सुप् | + | अन्तम् | = | सुबन्तम् |



SCERT TELANGANA

| 2. वर्गीयव्यञ्जनानि + मृदुव्यञ्जनम् (दृश्) = जश् |
|---|

| | | | | |
|---|---|---|---|---|
| १. वाक् | + | व्यवहारः | = | वाग्व्यवहारः |
| २. अच् | + | वर्णः | = | अज्वर्णः |
| ३. मधुलिट् | + | डयते | = | मधुलिड्डयते |
| ४. महत् | + | यशः | = | महद्यशः |
| ५. सुप् | + | विभक्तिः | = | सुब्विभक्तिः |

## ई. अधः दत्तानि सन्धिकार्याणि कुर्वन्तु ।

### अ. सन्धिं कुर्वन्तु ।

१. वाक् + देवताः

२. उत् + गमः

३. तत् + यथा

४. सत् + गुणः

५. स्वर्गात् + अपि

६. प्राक् + एव

### आ. विसन्धिं कुर्वन्तु ।

१. तदपि

२. अब्जम्

३. जगद्गुरुः

४. महदिदम्

५. तावदेनम्

६. सम्यगभिहितम्

### परियोजनाकार्यम्

अस्य पाठस्य कर्तुः दण्डिमहाकवेः जीवनकालम् इतररचनाः बिरुदानि जानन्तु । तथैव केषाञ्चन संस्कृतकवीनां जीवनविशेषान् सङ्गृह्य भित्तिपत्रे लिखन्तु ।

**अश्वमेधसहस्राद्धि सत्यमेवातिरिच्यते ।**

SCERT TELANGANA